## ।। अथ लिङ्गानुशासनम् ।।

लिङ्गानाम् अनुशासनमिति लिङ्गानुशासनम्। केषां लिङ्गानुशासनम्? व्याकरणस्य शब्दानां लिङ्गानुशासनम्, शब्दानां प्रातिपदिकत्वात्। अत्र हि ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'' इति सूत्रं प्रमाणम्। पुनश्च व्याकरणशास्त्रे लिङ्गव्यवस्थाया: नियामकं किमिति जिज्ञासायां 'स्त्रियाम्' सूत्रेऽस्मिन् प्रारम्भे भाष्यकारेण निगदितम् -

**स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**
**उभयोरनन्तरं यच्च तदभावे नपुंसकम्।।**

उक्तानुसारेण लिङ्गव्यवस्थाया: निर्धारणमसंभवं यतो हि -

**लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रूकुंसे टाप् प्रसज्यते।**
**नत्वं खरकुटीः पश्य खट्वावृक्षौ न सिद्ध्यतः।।**

अर्थात् स्तनकेशवतीत्वलोमत्वयोरेव लिङ्गाधार: स्वीक्रियते तदा तु भ्रुंकुस: = स्त्रीवेशधारी नट: स्त्रीत्वे स्यात् यतो हि नाटकमञ्चने स: स्तनकेशवान् भवति, पुनश्च खरकुटी: (नापितस्य गृहम्) खरकुटी+शस् इत्यत्र द्वितीया बहुवचने ''तस्माच्छसो न: पुंसि'' इत्यनेन सकारस्य स्थाने नत्वं स्यात् यतो हि खरकुटी लोमश: भवत्येव अत: पुंस्त्वस्यानापत्ति:। अनेनैव 'खट्वा' इत्यत्र स्त्रीत्वं न स्यात् स्तनकेशवतीत्वाभावात्। 'वृक्ष:' इत्यत्र पुंस्त्वं न स्यात् लोमशाभावात्। एवं व्याकरणस्य लौकिकलक्षणमिदं लिङ्गस्य खट्वा, माला, तट, घट, पट इत्यादिषु जडपदार्थेषु न घटितं भवति, अत एव व्याकरणशास्त्रे न आश्रयणीयमेतत्। वस्तुतस्तु सत्वरजस्तमोगुणानां मध्ये कस्यचिद्गुणस्योपचयांश: पुंस्त्वम् (उपचय: = वृद्धिरिति), अपचयांश: (ह्रास:) स्त्रीत्वम् इति। नपुंसकता तु तत्र कस्यचिद् गुणस्य साम्यावस्था अर्थात् उपययापचयराहित्येन सपरिणाम:। अतएव उत्कर्षापकर्षसत्वेऽपि स्थितिमात्रमादाय सामान्ये नपुंसकम् इति प्रवादस्योत्कर्षापकर्षसाम्यात्मकावस्थात्रयसाधारण स्थितिमात्रविवक्षायां नपुंसकं भवतीति तदर्थ:। अनेन 'लिङ्गम्' अर्थनिष्ठं भवति न तु शब्दनिष्ठम्। परं वाच्यवाचकयो: अभेदोपचारात्वात् व्यवहारे शब्दा: पुल्लिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च प्रयुक्ता: भवन्ति। अत्रापि ध्यातव्यं यत् ब्रह्मन्, आत्मन इत्यादिषु सत्त्वरजस्तमोगुणानां विपरिणामो न दृश्यते तथापि सत्वरजस्तमोगुणानां आरोपणं कृत्वा लिङ्गव्यवस्था स्वीकरणीया। सत्त्वरजस्तमोगुणानामुपचयापचयस्थितित्वेन लिङ्गनिर्धारणे या विवक्षाऽस्ति सा अस्मदादीनां प्रयोक्तृणामाश्रिता न भवति एतस्या: नियामकास्तु शिष्टा: एव भवन्ति। तेषां विवक्षा एव व्याकरणलिङ्गानुशासनकोषादिषु निबद्धाऽस्ति। इदमेव अस्माभिरनुसरणीयं न तु स्वेच्छया। एतस्मादेव केचन शब्दा: त्रिषु लिङ्गेषु प्रयुक्ता: भवन्ति केचन द्विलिङ्गा: भवन्ति, यथा - (तट:, तटी, तटम्), (शुक्ल:, शुक्ला, शुक्लम्), (कृष्ण:, कृष्णा, कृष्णम्), (गौरयम्, गौरियम्), (अशनिरयम्, अशनिरियम्) इति। अत एव इदमेव वक्तव्यमस्ति यत् व्याकरणशास्त्रे लिङ्गनिर्धारणं शिष्टप्रयोगेष्वाश्रित शास्त्रनियमानुसारेण भवति न तु स्वेच्छया लोकपरम्परया वा।

## ।। अथ स्त्रीलिङ्गप्रकरणम् ।।

**१. लिङ्गम्। अधिकारोऽयम् -**

**सूत्रार्थः** - इत ऊर्ध्वं ''सर्वादीनि सर्वनामानि'' इति सूत्रं यावत् अस्याधिकारो बोध्य:।

**व्याख्या** - महर्षि: पाणिनि: लिङ्गानुशासनस्यादौ सर्वतो प्राक् सूत्रं विचारयामास 'लिङ्गमिति'। तत्रादौ ग्रन्थस्यारम्भे मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरित्युक्तिदिशा मङ्गलाचारमुखेनाह प्रथममिदं सूत्रम्। ''शब्दानामनेकार्थत्वात्'' लिङ्गशब्दोऽयं सगुणब्रह्मण: सदाशिवस्य वाचकत्वेन मन्यते, एवञ्च नपुंसकत्वेन सर्वव्यापकनिर्गुणब्रह्मण: वाचकत्वात् माङ्गलिकमिति प्रथितम्।

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।**

कारिकोक्तलक्षणानुसारं 'लिङ्गम्' सूत्रमिदं अधिकारसूत्रमस्ति। अधिकारसूत्रञ्च - 'स्ववाक्यार्थबोधशून्यत्वे सति स्वोत्तरवाक्यार्थबोधकत्वम्। अर्थात् सूत्रस्य यस्मिन्नध्याये यस्मिन्पादे पठनं कृतं तत्र वाक्यार्थशून्यता भवति उत्तरोत्तरफलजनकता च।

**२. स्त्री। अधिकार सूत्रे एते -**

**सूत्रार्थः** - इत ऊर्ध्वं ''शलाका स्त्रियां नित्यम्'' इति सूत्रपर्यन्तमस्य सूत्रस्याधिकारः प्रचलिष्यति।

**व्याख्या** - ''लिङ्गम्'' 'स्त्री' अनयोः द्वयोः सूत्रयोः एक सह प्रयोगः कृतः एतस्मात् मूले द्विवचनस्य प्रवृत्तिः दृश्यते ''अधिकारसूत्रे एते'' इति। ''शलाका स्त्रियां नित्यम्'' सूत्रेऽस्मिन् नित्यग्रहणात् अन्यत्र कुत्रचिदस्य व्याभिचारोऽपि ज्ञाप्यते। एतस्मात् ''ताराधाराज्योत्स्नादयश्च'' इति पर्यन्तमेव 'स्त्री' इति सूत्रस्याधिकारो वर्तते इति बोध्यम्। ननु त्रिषु लिङ्गेषु सर्वतो प्राक् स्त्रीलिङ्गप्रकरणं विवेचितं तर्ह्यत्र किं चिन्तनं महर्षिपाणिनेः? प्रकरणेऽस्मिन् सयुक्तिकं प्रमाणमत्रोपस्थाप्यते -

१. 'मातृदेवो भव' 'पितृदेवो भव' 'आचार्यदेवो भव' 'अतिथिदेवो भव' इति उपनिषत्सु पठ्यतेऽत्रापि मातुरेव प्रथमं स्थानम्।

२. प्रकृति - पुरुषयोः प्रकृतेः प्राधान्यं वर्तते एतस्मात् ''अभ्यर्हितञ्च'' इति वार्तिकानुसारेण प्राधान्यस्य (श्रेष्ठस्य) पूर्वप्रयोगः कृतः।

३. भारतीय परम्परायां लोकेऽपि लक्ष्मीनारायणाभ्यां नमः, उमामहेश्वराभ्यां नमः, वाणीहिरण्यगर्भाभ्यां नमः, शचीपुरन्दराभ्यां नमः, अत्रापि लक्ष्यादीनां प्राधान्येन प्रयोगः कृतः।

४. महाकवि कालिदासस्य प्रसिद्धोऽयं श्लोकोऽपि अत्र प्रमाणत्वेन पठ्यते।

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।**

एवं प्रथमतया स्त्र्यधिकारस्य प्रयोगः उचितमेव प्रतीयते।

**३. ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः -**

**ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः। सवस्रादिपञ्चकस्यैव ङीप निषेधेन कर्त्रीत्यादेङीपा ईकारान्तत्वात्। तिसृचतस्त्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात्।**

**सूत्रार्थः** - ऋकारान्ताः मातृ-दुहितृ-स्वसृ-यातृ-ननान्दृ इत्येते शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** - माता च दुहिता च स्वसा च पोता च ननान्दा चेति ऋकारान्ता------------ननान्दरः (इतेरतरद्वन्द्वसमासः)। ऋकारोऽन्ते येषान्ते ऋकारान्ताः (बहुव्रीहिसमासः)। अत्र सूत्रेऽस्मिन् प्रतिपदोच्चारणात् एते पञ्चैव स्त्रलिङ्गाः भवन्ति। अन्ये ये ऋकारान्ताः सन्ति से पुंसि नपुंसके वा प्रयुक्ताः भवन्ति इत्याशयः। कुत्रचित् यातृ शब्दस्य स्थाने 'पोतृ' शब्दस्यापि पाठभेदो दृश्यते। प्रकृतेऽस्मिन् सूत्रे तिसृ, चतसृ, अनयोः ग्रहणं न भवति। ''त्रिचतुरो स्त्रियां तिसृ चतसृ'' इति सूत्रेण त्रि, चतुर्, इत्यनयोः शब्दयोः स्थाने विहितौ तिसृचतस्रौ आदेशरूपे स्तः अतः मूले ऋकारान्तत्वाभावो दृश्यते। यद्यपि स्वस्रादयः सप्त सन्ति -

**स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।**
**याता मातेति सप्तैते स्वस्रादयः उदाहृताः।।**

परमत्र पञ्चानामेव ग्रहणं कृतम्।

**उदाहरणानि** - इयं माता। दुहिता। स्वसा। याता। ननान्दा

**४. अन्यूप्रत्ययान्तो धातुः -**

**अनिप्रत्ययान्तः ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। अवनिः। चमूः। प्रत्ययग्रहणं किं - देवयतेः क्विप्।**

**द्यूः। विशेष्य लिङ्गः।**

**सूत्रार्थः** – 'अनि' प्रत्ययान्तः 'ऊ' प्रत्ययान्तश्च धातुः स्त्रीलिङ्गो भवति।

**व्याख्या** – अनिश्च ऊश्चेति अन्यू, अन्यू प्रत्ययौ अन्ते यस्य स अन्यूप्रत्ययान्तः (द्वन्द्वमूलकबहुव्रीहिसमासः) पदमिदं प्रथमैकवचनान्तम्। 'धातुः' शब्दोऽयं प्रथमैकवचनान्तम्। अत एव अनि प्रत्ययान्तः ऊप्रत्ययान्तश्च प्रत्येकं शब्दः स्त्रीलिङ्गे प्रयुज्यते।

**उदाहरणानि** – इयम् अवनिः। इयम् चमूः।

**विशेषः – प्रत्ययग्रहणं किम् देवयते क्विप् द्यूः। विशेष्य लिङ्गः।** ननु ''अन्यूप्रत्ययान्तो धातुः'' सूत्रेऽस्मिन् प्रत्ययग्रहणं कथमिति चेदुच्यते सूत्रे प्रत्ययग्रहणाभावे प्रत्ययभिन्नानां अन्यन्तानां ऊकारान्तानां स्त्रीत्वं निर्बाधमेव। यथा – दिव् धातोः क्विप् प्रत्यये सर्वापहारे लोपे च कृते 'च्छ्वोः शूडनुनासिके' च इति सूत्रेण वकारस्य स्थाने ऊठादेशे कृते ''इकोयणचि'' इति सूत्रेण यणि कृते द्यू इति जाते प्रातिपदिकत्वात् स्वादिकार्ये द्यूः इति जायते। अत्र द्यूरित्यस्यापि ऊकारान्तत्वेन स्त्रीलिङ्गग्रहणं भवितुं शक्यते परं न भवति प्रत्ययान्तत्वाभावात्। अर्थात् 'द्यूः' शब्दोऽयं 'ऊ' प्रत्ययान्तो नास्ति इति दिक्।

५. **अशनिभरण्यरणयः पुंसि च – इयमयं वा अशनिः।**

**सूत्रार्थः** – अशनिः, भरणिः, अरणिः इत्येते धातुजशब्दाः पुल्लिङ्गे स्त्रीलिङ्गे च प्रयुक्ताः भवन्ति।

**व्याख्या** – अशनिश्च भरणिश्च अरणिश्चेति अशनिभरण्यरणयः (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदमिदम्। चकारस्य प्रयोगः समुच्चयार्थकः। तस्मात् सूत्रेण पुल्लिङ्गे विधानात् चकारबलाच्च एते धातुजाः शब्दाः पुल्लिङ्गे स्त्रीलिङ्गे च प्रयुज्यन्ते इत्यर्थो लभ्यते।

**उदाहरणानि** – इयम् अशनिः, अयम् अशनिः। इयम् भरणिः, अयम् भरणिः। इयम् अरणिः, अयम् अरणिः।

६. **मिन्यन्तः – मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। भूमिः। ग्लानिः।**

**सूत्रार्थः** – मिप्रत्ययान्ताः निप्रत्ययान्ताश्च धातुजशब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – मिश्च निश्चेति मिनी, मिनी अन्ते यस्य सः मिन्यन्तः। ''अन्यूप्रत्ययान्तो धातुः'' इति सूत्रात् 'प्रत्ययः' इति पदमनुवर्तते। 'धातोः' इत्यधिकारात् मि, नि प्रत्ययान्तो यो धातुरित्यर्थो प्राप्यते। 'स्त्री' इत्यन्वितं पदं सप्तम्यां विपरिणम्यते। अनेन सूत्रस्यास्य अर्थोऽयं लभ्यते यत् मि प्रत्ययान्तो यो धातुः नि प्रत्ययान्तो यो धातुः ततो जायमानः प्रत्येकं शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति इति।

**उदाहरणानि** – इयं भूमिः। इयं ग्लानिः।

७. **वह्निवृष्ण्यग्नयः पुंसि। पूर्वस्यापवादः** –

**सूत्रार्थः** – वह्नि-वृष्णि-अग्नि इत्येते नि प्रत्ययान्ताः धातुजशब्दाः पुल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – 'मिन्यन्तः' इति सूत्रेण विधीयमानस्य निषेधरूपेण प्रयुक्तमिदं सूत्रम्। अत एव मूले उक्तम् पूर्वस्यापवादः। पूर्वसूत्रेण प्राप्त स्त्रीलिङ्गं प्रबाध्य पुंस्त्वमनेन विधीयते। वह्निश्च वृष्णिश्च अग्निश्चेति वह्निवृष्ण्यग्नयः (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदम्। पुंसि इति सप्तम्यन्तं पदम्।

**उदाहरणम्** – अयं वह्निः। वृष्णिः। अग्निः।

८. **श्रोणियोन्यूर्मयः पुंसि च – इयमयं वा श्रोणिः।**

**सूत्रार्थः** – श्रोणि-योनि-ऊर्मि इत्येते धातुशब्दाः पुल्लिङ्गे स्त्रीलिङ्गे च प्रयुक्ताः स्युः।

**व्याख्या** – श्रोणिश्च योनिश्च ऊर्मिश्चेति श्रोणियोन्यूर्मयः (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदमिदम्। सूत्रे चकारग्रहणात् स्त्रीत्वप्राप्तिर्भवति। 'पुंसि' इति सप्तम्यन्तं पदम्। अनेन पुल्लिङ्गविधानं क्रियते। अतः 'मिन्यन्तः' इति सूत्रस्य अपवादरूपेणमिदं सूत्रमस्ति। अत एव श्रोणिः, योनिः, ऊर्मिः इत्येते शब्दाः पुंसि स्त्रियां च प्रयुज्यन्ते

इत्याशयः।

**उदाहरणनि** – अयम् इयं वा श्रोणिः। योनिः। ऊर्मिः।

९. **क्तिन्नन्तः – स्पष्टम्। कृतिरित्यादि।**

**सूत्रार्थः** – क्तिन् प्रत्ययान्ताः धातुजशब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – क्तिन् अन्ते यस्य सः क्तिन्नन्तः। सूत्रे मूले उक्तम् – ''स्पष्टम्''। अर्थात् ''स्त्रियां क्तिन्'' इति सूत्रेण स्त्रीत्वेऽर्थे एव क्तिन् प्रत्ययो भवति। एतेन क्तिन् प्रत्ययान्तो धातुजशब्दो स्त्रीलिङ्गवाचको भवतीति आशयः।

**उदाहरणानि** – कृतिः। कृतिरियं कालिदासस्य। एवमेवः – दृतिः, बुद्धिः, लब्धिः, हतिः, धृतिः, वृष्टिः, दृष्टिः, श्रुतिः, स्तुतिः इत्यादयः भवन्ति।

१०. **ईकारान्तश्च – ई प्रत्ययान्तः स्त्री स्यात्। लक्ष्मीः।**

**सूत्रार्थः** – ई प्रत्ययान्ताः धातुजशब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – ईकारोऽन्ते यस्य सः ईकारान्तः। सूत्रेऽस्मिन् चकारग्रहणं धात्वधिकारनिवृत्यर्थम्। अत्र ईकारः प्रत्ययः एव गृह्यते पूर्वोत्तर प्रत्ययस्यैव साहचर्यात्। अतः सूत्रार्थोऽयं लभ्यते यत् ईप्रत्ययान्तो धातुः स्त्रीलिङ्गो भवतीति।

**उदाहरणानि**– इयं लक्ष्मीः। लक्षदर्शनाङ्कयोः अस्माद्धातोः 'लक्षेर्मुट्च्' इत्यादि उणादिसूत्रेण ई प्रत्यये मुडागमे च कृतेऽनुबन्धलोपे लक्ष्मी इति जाते प्रातिपदिकत्वात् प्रथमायाः एकवचने सु विभक्तौ लक्ष्मीः इति सिद्धम्। एवमेव अवीः, तरीः, तन्त्रीः, पपीः इत्यादयः ई प्रत्ययान्ताः।

११. **ऊङ्ङ्याबन्तश्च।। कुरूः। विद्या।**

**सूत्रार्थः** – ऊङ् प्रत्ययान्ताः आप् प्रत्ययान्ताश्च शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – ऊङ् च आप् चेति ऊङापौ तयोः अन्ते यस्य सः ऊङाबन्तः (द्वन्द्वमूलकबहुव्रीहिः)। सूत्रे आप् ग्रहणेन टाप्, डाप्, चाप् इत्येतेषां प्रत्ययानां ग्रहणं भवति। ऊङ् प्रत्ययः 'ऊङुतः' इति सूत्रेण भवति। अतः ऊङ् प्रत्ययान्ताः आप् प्रत्ययान्ताश्च शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते इत्यर्थो लभ्यते। अस्मिन् सूत्रे कुत्रचित् ङीप् ग्रहणमपि वर्तते, अतः 'ऊङ्ङ्याबन्तश्च' एवम्प्रकारेणापि सूत्रमिदं पठ्यते। तदनुसारेण ङी प्रत्ययान्ताः इति ग्रहणेन ङीप्, ङीष्, ङीन् इत्येतेषां प्रत्ययानामपि ग्रहणमत्र भवति, तदा सूत्रस्यास्य अर्थोऽयं भवति यत् ऊङ् प्रत्ययान्ताः, ङी प्रत्ययान्ताः, आप् प्रत्ययान्ताश्च शब्दाः स्त्रीलिङ्गे प्रयुक्ता भवन्ति इति।

**उदाहरणानि** – ऊङ् प्रत्ययान्ताः – इयं कुरूः। अलाबूः। पङ्गूः। करभोरूः। श्वश्रूः।

आप् प्रत्ययान्ताः – इयं विद्या अजा। वत्सा। एडका। कोकिला। चटका।

ङी प्रत्ययान्ताः – कर्त्री। हर्त्री। दण्डिनी। ब्राह्मणी। गौरी। सूरी। इत्यादयः।

१२. **य्वन्तमेकाक्षरम् – श्रीः। भूः। एकाक्षरं किम। पृथुश्रीः।**

**सूत्रार्थः**– एकाक्षरयुक्ताः ईकारान्ताः ऊकारान्ताश्च शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – ई च ऊ चेति यू, यू अन्ते यस्य तद् य्वन्तम्। एकमक्षरं यस्य तदेकाक्षरम्। य्वन्तञ्च तद् एकाक्षरमिति य्वन्तमेकाक्षरम्। एतेन ईकारान्तम् ऊकारान्तञ्च यदेकाक्षरं शब्दस्वरूपं तत् स्त्रीलिङ्गं भवति इत्यर्थो लभ्यते।

**उदाहरणानि** – इयं श्रीः। इयं भ्रूः।

**विशेषः** – एकाक्षरं किम्? पृथुश्रीः। सूत्रे 'एकाक्षरम्' इति पदस्य ग्रहणं न क्रियते चेत् ''पृथुश्री'' इत्यत्रापि स्त्रीलिङ्गस्य प्रसङ्ग आयाति ईकारान्तात्वात्। परं एकाक्षरमेव स्यात् इति विधानादत्र न भवति स्त्रीत्वम्। अत एव एकाक्षरग्रहणमुपयुक्तमेव।

१३. **विंशत्यादिरानवतेः – इयं विंशतिः त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः।**

**सूत्रार्थः** – विंशत्यादयः आनवतेः (नवतिपर्यन्तम्) संख्यावाचकाः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – विंशतिः आदिर्यस्य सः विंशत्यादिः। 'आङ्मर्यादाभिविध्यौ' इति सूत्रेण आ इति मर्यादार्थे प्रयुज्यते, अत एव 'आनवतेः' इत्यस्य अर्थोऽयं लभ्यते नवतिपर्यन्तमिति। एतेन विंशतिः इत्यारभ्य नवतिपर्यन्तं संख्याकाः शब्दाः स्त्रीलिङ्गे भवन्ति। विंशतिः इत्यादयः शब्दाः रूढिशब्दाः वर्तन्ते तस्मात् निपातनात् एतेषां सिद्धयः भवन्ति। तदर्थं सूत्रमस्ति ''पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टि सप्तत्यशीतिनवतिशतम्। द्वौ दशतौ परिमाणमस्येति विंशतिः। त्रयो दशतो परिमाणस्येति त्रिंशत्। चत्वारः दशतः परिमाणस्येति चत्वारिंशत्। पञ्च दशतः परिमाणस्येति पञ्चाशत्। षट् दशतः परिमाणस्येति षष्टिः। सप्तदशतः परिमाणस्येति सप्ततिः। अष्ट दशतः परिमाणमस्येति अशीतिः। नव दशतः परिमाणमस्येति नवतिः।

**उदाहरणानि** – इयं विंशतिः। त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः।

**१४. दुन्दुभिरक्षेषु – इयं दुन्दुभिः। अक्षेषु किम्। अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः।**

**सूत्रार्थः** – अक्षेष्वर्थेषु दुन्दुभिः शब्दः स्त्रीलिङ्गो भवति।

**व्याख्या** – दुन्दुभिः शब्दः वाद्यविशेषाद्यर्थेष्वपि प्रयुक्तो भवति, तद्वाचकः शब्दः पुल्लिङ्गो भवति। अतः वाद्यविशेषाद्यतिरिक्त अक्षार्थेषु एव दुन्दुभिः शब्दः स्त्रीलिङ्गो भवति इति स्पष्टम्। अत एव लिखति मूलकारः – ''अक्षेषु किम्। अयं दुन्दुभिर्वाद्यविशेषोऽसुरोवेत्यर्थः। दुन्दुभिः नाम राक्षसस्यापि, तस्य पुंस्त्वे प्रयोगो भवति, अयं दुन्दुभिः (राक्षसः)। अयं दुन्दुभिः (वाद्यविशेषः)।

**उदाहरणानि**– इयं दुन्दुभिः।

**१५. नाभिरक्षत्रिये – इयं नाभिः।**

**सूत्रार्थः** – अक्षत्रियेऽर्थे 'नाभिः' इति शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति।

**व्याख्या** – न क्षत्रियः इति अक्षत्रियः तस्मिन् अक्षत्रिये। अक्षत्रियेर्थे गम्यमाने सत्येव 'नाभि' इति शब्दस्य स्त्रीलिङ्गे प्रयोगो भवति न तु अन्यार्थे। सूत्रे नाभिः इति प्रथमान्तं पदम्, अक्षत्रिये इति सप्तम्यन्तं पदम्।

**उदाहरणानि** – इयं नाभिः = प्राण्यङ्ग विशेषः, कस्तूरी मृगनाभिर्वा।

**१६. उभावन्यत्र पुंसि – दुन्दुभिर्नाभिश्चोक्त। विषयादन्यत्र पुंसि स्तः। नाभिः क्षत्रियः। कथं तर्हि समुल्लसत्पङ्कजपत्र कोमलैरूपाहितश्रीण्युपनीविनाभिरिति भारविः। उच्यते–दृढं भक्तिरित्यादाविव कौमलैरिति सामान्ये नपुंसकं बोध्यम्। वस्तुतस्तु ''लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति'' भाष्यात्पुंस्त्वमपीह साधु। अत एव नाभिर्मुख्य नृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे इति मेदिनी। रबसोप्याह। मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः। चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामद इति। एवमेव विधेऽन्यत्रापि बोध्यम्।**

**सूत्रार्थः** – दुन्दुभिः नाभिश्च इत्येतौ शब्दौ क्रमेण अक्षादक्षत्रियाच्चान्यत्र पुल्लिङ्गे प्रयुज्येते।

**व्याख्या** – सूत्रे ''उभौ'' इति पदेन दुन्दुभिः, नाभिरिति शब्दौ गृह्यते। अन्यत्र अर्थात् अक्षादन्यत्र दुन्दुभिः शब्दः, क्षत्रियवाचकः नाभिशब्दश्च पुल्लिङ्गे प्रयुक्तौ भवतः इत्याशयः। सूत्रे 'पुंसि' इति सप्तम्यन्तं पदमस्ति। अतः 'नाभिः क्षत्रियः' इत्यस्मिन् प्रयोगे 'नाभि' शब्दः क्षत्रियार्थकत्वात् 'अयं नाभिः' इति प्रयुज्यते। देहमध्यवर्ति चक्रात्मकचिह्नविशेषः।

**उदाहरणानि**– अयं दुन्दुभिः। अयं नाभिः।

**विशेषः** –अस्मिन् प्रसङ्गे मूलकार भारवेः उदाहरणं प्रस्तौति – ''समुल्लसत्पङ्कजपत्र–कोमलैरूपाहित श्रीण्युपनीविनाभिरिति भारविः। अत्र यत् कोमलैरित्युक्तं नाभिरित्यस्य विशेषणत्वेन तत्कथं सङ्गच्छेत् तत्समाधानार्थं मूले उच्यते – दृढं भक्तिः दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम्। तथाप्यरुचिं चित्ते निधाय मूले उक्तम् – वस्तुतस्तु लिङ्गं शासयितुं योग्यं न भवति शब्दानां लिङ्गस्तु लोकप्रयोगमनुसृत्य काव्यकोषनाटकादीनां प्रयोगमाधृत्य अवगन्तुं शक्यते अत एव भाष्यकारेणोक्तम् – लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति मतमाधृत्यात्र ''नाभि'' इति शब्दे पुंस्त्वमपि साधु।

अत्रैव मेदिनी कोषे उक्तम् –

**नाभिमुख्यनृपे चक्रमध्ये क्षत्रिययोः पुमान्।**
**द्वयोर्प्राणि प्रतीके स्यात् स्त्रियां कस्तूरिका मद इति।।**

रभस कोषकारोऽपि –

**मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः।**
**चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिका मद इति।।**

एवमेवान्यत्रापि साधुत्वं बोध्यमिति।

१७. **तलन्तः।। अयं स्त्रियां स्यात्। शुक्लस्य भावः शुक्लता। ब्राह्मणस्य कर्म ब्राह्मणता। ग्रामस्य समूहो ग्रामता। देव एव देवता।**

**सूत्रार्थः** – तल् प्रत्ययान्ताः ये शब्दाः ते स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – तल् अन्ते यस्य सः तलन्तः (बहुव्रीहिसमासः)। तल् प्रत्ययः 'तस्यभावस्त्वतलौ' इति सूत्रेण विधीयते। अतः तल् प्रत्ययान्तत्वात् शुक्लस्य भावः शुक्लता इति भवति। एवमेव ''ग्रामजनबन्धुसहायेभ्यस्तल्'' इत्यनेन तल् विधीयते तदा ग्रामता, जनता, बन्धुता, सहायता इत्यादयः भवन्ति। 'देवात्तल्' इति सूत्रेण तल् प्रत्ययेन देवता इति जायते। अतः ''स्त्रियः'' अधिकारत्वात् सूत्रस्यास्य अर्थोऽयं लभ्यते यत् तल् प्रत्ययान्ताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते इति।

**उदाहरणानि** – इयं शुक्लता। ब्राह्मणस्य कर्म ब्राह्मणता। ग्रामस्य समूहो ग्रामता। देव एव देवता।

१८. **भूमिविद्युत्सरिल्लतावनिताभिधानानि।। भूमिर्भूः। विद्युत्सौदामनी। सरिन्निम्नगा। लता बल्ली। वनिता योषित्।**

**सूत्रार्थः** – भूमि, विद्युत्, सरित्, लता, वनिता इत्येते शब्दाः एतेषां पर्यायवाचिनश्च स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – भूमिश्च विद्युत् च सरित् च लता च वनिता चेति भूमिविद्युत्सरिल्लतावनिताः तेषामभिधानानि (द्वन्द्वमूलकबहुव्रीहिः)। सूत्रेऽस्मिन् 'अभिधान' शब्दः पर्यायवाचकः अतः सूत्रोक्ताः शब्दास्तु स्त्रीलिङ्गे भवन्ति एव तेषां पर्यायवाचकाः शब्दा अपि स्त्रीलिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणम्** – इयं भूमिः। विद्युत्। सरित्। लता। वनिता।

१९. **यादो नपुंसकम्।। याद शब्दः सरिद् वाचकोऽपि क्लीबं स्यात्।**

**सूत्रार्थः** – 'याद' शब्दः नपुंसकलिङ्गो भवति।

**व्याख्या** – इदं पूर्वसूत्रस्यापवादसूत्रमस्ति। 'याद' शब्दः सरित्वाचकोऽस्ति, अतः पूर्वसूत्रेणात्रापि स्त्रीत्वस्य प्राप्तिर्भवति परं तं प्रबाध्य प्रकृत सूत्रेण नपुंसकत्वं विधीयते।

**उदाहरणानि** – इदं यादः। (सरित्)

२०. **भाः स्रुक्स्रग्दिगुष्णिगुपानहः।। एते स्त्रियाँ स्युः इयं भाः इत्यादि।**

**सूत्रार्थः** – भ्रास् स्रक् स्रग् दिक् उष्णिक् उपानह् इत्येते शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – भाश्च स्रक् च स्रग् च दिक् च उष्णिक् च उपानच्चेति ते भास..........उपानहः (इतरेतरद्वन्द्वः) सूत्रोक्ताः सर्वे शब्दाः स्त्रियां प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**– इयं भाः। स्रक्। स्रग्। उष्णिक्। उपानत्।

२१. **स्थूणोर्णे नपुंसके च।। एते स्त्रियां क्लीवे च स्तः। स्थूणा। स्थूणम्। उर्णा। ऊर्णम्। तत्र स्थूणा काष्ठमयी द्विकर्णिका। ऊर्णा तु मेषादिलोम।**

**सूत्रार्थः** – स्थूणा ऊर्णा इत्येतौ शब्दौ स्त्रीलिङ्गे पुल्लिङ्गे च प्रयुक्तौ भवतः।

**व्याख्या** – स्थूणा च ऊर्णा चेति स्थूणोर्णे। अथवा स्थूणञ्च ऊर्णञ्चेति स्थूणोर्णे। सूत्रे चकारग्रहणेन स्त्रीत्वमपि भवति। अतएव सूत्रार्थो लभ्यते यत् इमौ द्वावपि शब्दौ नपुंसके स्त्रियां च प्रयुज्येते। यथा – १. इयं स्थूणा (काष्ठमयी द्विकर्णिका) स्त्री. इदं स्थूणम्। २. इयं ऊर्णा (मेषादिलोम) इदं ऊर्णम्।

**२२. गृहशशाभ्यां क्लीबे।। नियमार्थमिदम्। गृह शशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः। गृहस्थूणम्। शशोर्णं शशलोमनीत्यमरः।**

**सूत्रार्थः** – गृहशशाभ्यां परौ स्थूणोर्णशब्दौ नपुंसके प्रयुक्तौ स्याताम्।

**व्याख्या** – नियमार्थमिदं सूत्रम्। यतो हि पूर्वं 'स्थूणोर्णे नपुंसके च' इति सूत्रेण स्थूणा ऊर्णा इत्येतौ शब्दौ स्त्रीलिङ्गे नपुंसकलिङ्गे च निर्दिष्टौ। पुनः अनेन सूत्रेण नपुंसकविधानस्य काऽवश्यकता, अतः क्लीबपदस्य ग्रहणं व्यर्थः सति ज्ञापयति यत् गृहशब्दोत्तर स्थूणाशब्दः शशशब्दोत्तरोर्णा शब्दश्च नपुंसकलिङ्गे एव भवति इत्याशयः।

**उदाहरणानि**– इदं गृहस्थूणम्। इदं शशोर्णम्।

**२३. प्रावृट् विप्रुट् रुट्विट्त्विषः।। एते स्त्रियाँ स्युः।**

**सूत्रार्थः** – प्रावृट् विप्रुट् रुट् विट् त्विट् इत्येते शब्दाः स्त्रीलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – प्रावृट् च विप्रुट् च रुट् च विट् च त्विट् चेति प्रावृट्विप्रुट्रुटत्विषः (इतरेतरद्वन्द्वः)। स्त्रियः अधिकारत्वात् सूत्रोक्ताः शब्दाः स्त्रीलिङ्गा भवन्ति इत्याशयः।

**उदाहरणम्** – इयं प्रावृट्। विप्रुट्। रुट्। विट्। त्विट्।

**२४. दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधि कट्यङ्गुलयः।। एते स्त्रियां स्युः। पक्षे ङीप्। दर्वी दर्विरित्यादि।**

**सूत्रार्थः** – दर्व्यादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गाः भवन्ति।

**व्याख्या** – दर्विश्च विदिश्च वेदिश्च खनिश्च शनिश्च अश्रिश्च वेशिश्च कृषिश्च ओषधिश्च कटिश्च अङ्गुलिश्चेति दर्विविदि......... कट्यङ्गुलयः (इतरेतरद्वन्द्वसमासः)। 'दर्वि' शब्दोऽयं दृ धातोः ''वृदृभ्यां विन्'' इति सूत्रेण विन् प्रत्यये गुणे रपरत्वे च कृते सिद्धो भवति। सर्वतोऽक्तिन्नर्थादित्येके इत्यनेन विकल्पेन ङीप् कृते सति दर्वी इत्यपि रूपं भवति। अत एव इयं दर्विः – दर्वी इति रूपद्वयं भवति।

**उदाहरणानि**– इयं दर्विः। विदिः। वेदिः। खनिः। शनिः। अश्रिः। वेशिः। कृषिः। ओषधिः। कटिः। अंगुलिः।

**२५. तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः।। एते प्राग्वत्। इयं तिथिरित्यादि अमरस्त्वाह–तिथयो द्वयोरिति। तथा च भारविः। तस्य भुविबहुतिथास्तिथय इति। स्त्रीत्वे हि बहुतिथ्य इति स्यात्। श्री हर्षश्च–निखिलान्निशि पौर्णिमातिथीनिति।**

**सूत्रार्थः** – तिथिनाड्यादयः रात्र्यादयश्च शब्दाः स्त्रीलिङ्गा भवन्ति।

**व्याख्या** – तिथिश्च नाडिश्च रूचिश्च वीचिश्च नालिश्च धूलिश्च किकिश्च केलिश्च छविश्च रात्र्यादयश्चेति (इतरेतरद्वन्द्वः)। रात्र्यादयः इत्यत्र रात्रिरादिः येषां ते रात्र्यादयः (बहुव्रीहिः)। स्त्र्यधिकारो वर्तते। अतः सूत्रोक्ताः तिथ्यादयः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति। 'रात्र्यादयः' इत्यत्र आदिपदेन रात्रिशब्दस्य पर्यायवाचिनः शब्दाः अपि स्त्रीलिङ्गे प्रयुक्ताः भवन्ति। यथा – रात्रिः, शर्वरी, निशा, क्षपा, रजनी, यामिनीत्यादयः। अमरकोषे तिथिशब्दः स्त्रीलिङ्गे पुंसि च प्रयुक्तोऽस्ति। अत एव मूले उक्तम् – 'तिथयो द्वयोः'। महाकवि भारविना तिथिशब्दस्य प्रयोगः स्त्रियां पुंसि च कृतः। तदुच्यते – तस्य भुवि बहुतिथास्तिथय इति। पृषोदरादित्वात् ङीपि तिथी शब्दे बहुतिथ्य इति स्यात्। श्री हर्षेणापि स्वीये नैषधचरिते लिखितम् – 'निखिलान्निशिपौर्णमातिथीन्'। इत्यत्र 'तिथि' शब्दः द्वितीयाबहुवचनान्ते शस् प्रत्यये पुल्लिङ्गे प्रयुक्तोऽस्ति।

**उदाहरणानि**– इयं तिथिः। नाडिः। रूचिः। वीचिः। नालिः। धूलिः। किकिः। केलिः। छविः। रात्रिः।

२६. **शष्कुलिराजिकुट्य शनि भृकुटि त्रुटि वलि पंक्तयः।। एतेऽपि स्त्रियाँ स्युः। इयं शष्कुलिः।**

**सूत्रार्थः** – शष्कुलिराजिकुट्यादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गाः भवन्ति।

**व्याख्या** – शष्कुलिश्च राजिश्च कुटिश्च अशनिश्च वर्तिश्च भृकुटिश्च त्रुटिश्च वलिश्च पंक्तिश्चेति शष्कुलि.........वलिपंक्तयः (इतरेतरद्वन्द्वः)। 'स्त्री' इति सूत्रस्याधिकारात् स्त्रीत्वमत्र प्राप्यते। अत एव एते सूत्रोक्ताः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**– इयं शष्कुलिः। राजिः। कुटिः। अशनिः। वर्तिः। भृकुटिः। त्रुटिः। वलिः। पंक्तिः।

२७. **प्रतिपदापद्विपदसम्पच्छरत्संसत्परिषदुषः सम्वित्क्षुत्पुन्मुत्समिधः।। इयं प्रतिपदित्यादि। उषा उच्छन्ति। उषाः प्रातरधिष्ठात्रा देवता।**

**सूत्रार्थः** – प्रतिपदापत्विपदादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – प्रतिपच्च आपच्च विपच्च सम्पच्च शरच्च संसच्च परिषच्च उषाश्च क्षुच्च पुच्च मुच्च समित् चेति प्रतिपदाप......... .........समिधः (इतरेतरद्वन्द्व)। प्रतिपदादयः सर्वे शब्दाः क्विप् प्रत्ययान्ताः सन्ति। 'स्त्री' इति सूत्रस्याधिकारात् सर्वे शब्दाः स्त्रियां प्रयुक्ताः भवन्ति इत्याशयः। तद्यथा– इयं प्रतिपत् इयं आपत् इत्यादयः। उषा उच्छन्ति। 'उषाः' इति पदेन प्रातरधिष्ठातृ देवतायाः निर्देशनम्।

**उदाहरणानि** – इयं प्रतिपत्। आपत्। विपत्। सम्पत्।

२८. **आशीर्धूः पूर्गीद्वारः।। इयमाशीरित्यादि।**

**सूत्रार्थः** – आशीः, धूः, पूः, गीः द्वा इत्येते शब्दाः स्त्रियां प्रयुक्ताः स्युः।

**व्याख्या** – आशीश्च धूश्च पूश्च गीश्च द्वाश्चेति ते आशीर्धूः पूर्गीर्द्वारः (इतरेतरद्वन्द्वः)। 'स्त्री' इत्यस्याधिकारो वर्तते। एतेन सूत्रोक्ताः शब्दाः स्त्रीलिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** – इयमाशीः। धूः। पूः। गीः। द्वाः।

२९. **अप्सुमनस्समासिकता वर्षाणां बहुत्वं च।। अवादीनां पञ्चानाम् स्त्रीत्वं स्यात् बहुत्वं च। आपः इमाः। स्त्रियः सुमनसः पुष्पम्। सुमना मालती जातिः। देववाची तु पुंस्येव। सुपर्वाणः सुमनसः। बहुत्वं प्रायिकम्। एका च सिकता तैलदाने असमर्थेति अर्थवत्सूत्रे भाष्य प्रयोगात्। समां समां विजायते ( १८१३ ) इत्यत्र समायां समायामिति भाष्याच्च। ''विभाषाघ्राघ्रेट्'' ( २३७६ ) इति सूत्रे अघ्रासातां सुमनसाविति वृत्ति व्याख्यायां हरदत्तोप्येवम्।**

**सूत्रार्थः** – अप् सुमनस्, समा, सिकता, वर्षा इत्येतेषां शब्दानां स्त्रीलिङ्गे बहुवचने विधानं भवति।

**व्याख्या** – आपश्च सुमनश्च समाश्च सिकताश्च वर्षाश्चेति (इतरेतरद्वन्द्वः)। तेषामिति अप्सुमनस्समासिकतावर्षाणामिति। बहुत्वम्–बहुत्वविवक्षा बोधनार्थम्। बहुत्वमत्र प्रायिकं वर्तते। विकल्पेन कुत्रचित् बहुत्वाभावेऽपि न क्षतिः। प्रमाणत्वेन 'अर्थवत्' सूत्रस्यभाष्ये ''एका च सिकता तैलदाने असमर्थेति'' अत्र सिकता पदस्य एकवचनान्तप्रयोगः भाष्यकारेण विहितः। समां समां विजायते इत्यत्रापि समायां समायां इति एकवचनान्तप्रयोगः भाष्यकारेण विहितः।

अत्रैव 'सुमना माली' इति एकवचनान्तः प्रयोगः कथम्? जात्यर्थे इति। देववाची सुमनस् शब्दस्तु पुल्लिङ्गः एव भवति। यथा अमरकोषकारेणोक्तम् – ''सुपर्वाणः सुमनसः'' इति। आचार्यहरदत्तेन ''विभाषाघ्राधेट्'' इति सूत्रे अघ्रासतां सुमनसौ इति प्रयोगः कृतः। एवं पूर्ववर्णितोदाहरणैः ज्ञातुं शक्यते यत् उक्तसूत्रेण विहितं बहुत्वं प्रायिकं वर्तते।

**उदाहरणानि** – इमा आपः। सुमनसः। समाः। सिकताः। वर्षाः।

३०. **स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः।। इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक्।**

**सूत्रार्थः** – सूत्रोक्ताः स्रक्त्वगादयः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – स्रक् च त्वक् च ज्योक् च वाक् च यवागूश्च नौ च स्फिक् चेति (इतरेतरद्वन्द्वः) ते स्रक्त्वक्........ नौस्फिजः (प्रथमाबहुवचनान्तं पदम्)। "स्त्रीः" इत्यस्याधिकारो वर्तते। तेन सूत्रे वर्णिताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणम्** – इयं स्रक्। त्वक्। ज्योक्। वाक्। यवागूः। नौ। स्फिक्।

**३१. तृटि सीमा संबध्याः।। इयं तृटिः। सीमा। संबध्या।**

**सूत्रार्थः** – तृटि, सीमा, संबध्या इत्येते शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – तृटिश्च सीमा च संबध्या चेति ते (इतरेतरद्वन्द्वः) तृटिसीमासंबध्याः। प्रथमाबहुवचनान्तं पदम्। 'स्त्री' इत्यस्याधिकारो वर्तते। तेन सूत्रोक्ताः शब्दाः स्त्रियां प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – इयं तृटिः। सीमा। संबध्या।

**३२. चुल्लिवेणिखार्यश्च।। स्पष्टम्।**

**सूत्रार्थः** – चुल्लि, वेणि, खारी इत्येते शब्दाः स्त्रीलिङ्गा भवन्ति।

**व्याख्या** – चुल्लिश्च, वेणिश्च, खारी चेति ते चुल्लिवेणिखार्यः (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। एतेषां सूत्रोक्तानां त्रयाणां स्त्रीलिङ्गे एव प्रयोगो भवति।

**उदाहरणानि**– इयं चुल्लिः। वेणिः। खारी।

**३३. ताराधाराज्योत्स्नादयश्च।।**

**सूत्रार्थः** – तारा, धारा, ज्योत्स्नादयश्च शब्दाः स्त्रीलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – ज्योत्स्ना आदिर्येषान्ते ज्योत्स्नादयः। तारा च धारा च ज्योत्स्नादयश्चेति ते ताराधाराज्योत्स्नादयः (इतरेतरद्वन्द्वः)। चकारेण स्त्रीत्वस्य ग्रहणम्। अत एव ज्योत्स्नादयः अर्थात् ज्योत्स्ना स्वयं तथा तस्य पर्यायाः चन्द्रिका, कौमुदी इत्यादयः स्त्रीलिङ्गाः भवन्ति।

**उदाहरणानि** – इयं तारा। धारा। ज्योत्स्ना।

**३४. शलाका स्त्रियां नित्यम्।। नित्यग्रहणमन्येषां क्वचिद् व्यभिचारं ज्ञापयति।**

**सूत्रार्थः** – शलाका शब्दो नित्यं स्त्रीलिङ्गे एव प्रयुज्यते।

**व्याख्या** – 'शलाका स्त्रियाम् नित्यम्' इत्यत्र नित्य ग्रहणं किमर्थम्? यतो हि 'स्त्री' इति सूत्रस्याधिकारात् अत्रापि शलाका शब्दस्य प्रयोगः स्त्रीलिङ्गे भवितुं शक्यते अतो नित्यग्रहणं व्यर्थमेव। अत्रैव नित्यग्रहणं व्यर्थं सत् बोधयति यत् नित्यपदस्य साहचर्यात् शलाकाशब्दस्य प्रयोगः स्त्रीलिङ्गे एव स्यात् न तु क्वचित् अन्येषामिव व्यभिचारः। यथा तिथि शब्दस्य स्त्रियां प्रयोगस्तु भवत्येव परं पुंस्त्वमपि पूर्वं प्रदर्शितं तथा न स्यादिति।

**उदाहरणानि**– इयं शलाका।

**इति पाणिनीयलिङ्गानुशासनेस्त्रीलिङ्गप्रकरणम्**

**– अथ पुंल्लिङ्गप्रकरणम्–**

**३५. पुमान्।। अधिकारोऽयम्।**

**सूत्रार्थः**– पुमान् इति सूत्रस्य प्रकरणान्तं यावदधिकारो वर्तते।

**व्याख्या**– अधिकारसूत्रमिदम्। स्वदेशे वाक्यार्थशून्यत्वे सति स्वेतरवाक्यार्थ जनकत्वमिति।

पुमान् इति सूत्रं स्वस्मिन् अर्थबोधशून्यत्वमुपपाद्यापि स्वेतर सूत्रेषु पुंस्त्वार्थं बोधयति। अतः "**सारथ्यातिथि कुक्षिवस्तिपाण्यञ्जलयः**" इति प्रकरणस्यान्तिमसूत्रपर्यन्तं पुंल्लिङ्गस्याधिकारो वर्तते।

**३६. घञबन्तः।। पाकः त्यागः। करः। गरः। भावार्थ एवेदम्। नपुंसकत्व विशिष्टे भावे क्तल्युड्भ्यां, स्त्रीत्वविशिष्टे तु क्तिन्नादिभिर्बाधेन परिशेषात्। कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम्। तथा च भाष्यम् –**

**संबन्धमनुवर्तिष्यते इति।**

**सूत्रार्थः**- घञ् प्रत्ययान्तः अप् प्रत्ययान्तश्च शब्द पुंल्लिङ्गे प्रयुक्तो भवति।

**व्याख्या**- घञ् च अप् चेति घञपौ तौ अन्ते यस्य सः घञबन्तः (द्वन्द्वमूलक बहुव्रीहिः)। पुमान् ''इत्यस्यधिकारो वर्तते।'' भावे घञ्'' इति सूत्रेण विहितः घञ् प्रत्यय एवात्र ग्राह्यः। अत एव'' भावे घञ्'' इति सूत्रेण कृतघञ्प्रत्ययान्तानां शब्दानामेव पुंल्लिङ्गे प्रयोगः भवितुमर्हति न तु कर्मादौ विहितानां घञाद्यन्तानामित्याशयः।

अतएव भाष्यकारेणोक्तम्- ''सम्बन्धमनुवर्तिष्यत् इति। अर्थात् तत्तदर्थप्रत्यय विशिष्टार्थे एव प्रयुज्यते इति। एवं भावे क्त प्रत्ययान्तशब्दानां ल्युट् प्रत्ययान्तशब्दानाञ्च प्रयोगः नपुंसकलिङ्गे क्तिन्नादि प्रत्ययान्तशब्दानां प्रयोगः स्त्रीलिङ्गे भवति।

**उदाहरणानि**- घञि - अयं पाकः/ त्यागः

अपि - अयं करः/ गरः

३७. **घाजन्तश्च।। विस्तरः। गोचरः। चयः। जयः इत्यादि।**

**सूत्रार्थः**- घ प्रत्ययान्ताः अच् प्रत्ययान्ताश्च शब्दाः पुंल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**- घश्च अच् चेतित घाचौ तौ अन्ते यस्य सः घाजन्तः (द्वन्द्वमूलक बहुव्रीहिः)। पुंस्त्वस्याधिकारो वर्तते। चकारः समुच्च्यार्थकः। प्रत्ययग्रहणे प्रत्ययान्तस्य ग्रहणं भवति, अत एव सूत्रे निर्दिष्टप्रत्ययान्तशब्दाः पुंल्लिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- घ प्रत्ययान्ते- विस्तरः, गोचरः।

अच् प्रत्ययान्ते- चयः, जयः।

३८. **भयलिङ्गभगपदानि नपुंसके।। एतानि नपुंसके स्युः। भयम्। लिङ्गम्। भगम्। पदम्।**

**सूत्रार्थः**- भय, लिङ्ग, भग, पद इत्येते शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या** - भयञ्च लिङ्गञ्च भगञ्च पदञ्चेति भयलिङ्गभगपदानि (इतरेतरद्धन्द्वसमासः)। नपुंसके इति विधेयं सप्तम्यन्तं पदम्। सूत्रमिदं पूर्वसूत्रस्यापवादो वर्तते। तथाहि ''चयः'' अच् प्रत्ययान्तत्वेन ''घाजन्तश्च'' इति सूत्रेण पुंल्लिङ्गे गण्यते तथैव ''भयः'' इति पदस्यापि 'भी' धातोः अच् प्रत्यये कृते सति निष्पत्तिर्भवति। अतः अच् प्रत्ययान्तत्वात् एतस्यापि गणना पुल्लिङ्गे एव भवितुं शक्यते सा न स्यात् एतदर्थमस्य सूत्रस्य विधानं कृतम्। ''अनवकाशो हि विधिरपवादः'' इति नियमः। तस्मात् भयम् इत्यादिपदानि ''भयलिङ्गभगपदानि नपुंसके'' इत्यनेन नपुंसकलिङ्गानि भवन्ति इत्याशयः।

**उदाहरणानि**- इदं भयम्/ लिङ्गम्/ भगम्/पदम्

३९. **नङन्तः।। नङ्प्रत्ययान्तः पुंसि स्यात्। यज्ञः। यत्नः।**

**सूत्रार्थः**- नङ् प्रत्ययान्तः शब्दः पुंसि स्यात्।

**व्याख्या** - नङ् अन्ते यस्य सः नङन्तः (बहुव्रीहिः)। यथा ''यज्ञः'' यज् धातोः ''यजयाचयतविच्छप्रच्छरक्षोनङ्'' इति सूत्रेण नङ् प्रत्यये कृतेऽनुबन्धलोपे च यज् न् इत्यवस्थायां स्तोः श्चुना श्चुः इत्यनेन श्चुत्वे कृते (नकारस्य ञकारे) जञोर्ज्ञः इति जाते पुंल्लिङ्गे यज्ञः इति सिद्धं भवति। अनेनैव यत् धातोः उक्तसूत्रेणैव नङ् प्रत्यये यत्नः इत्यस्यापि सिद्धिर्भवति। अत एव अनयोः द्वयोः पुंल्लिङ्गे प्रयोगो भवति।

**उदाहरणम्**- अयं यज्ञः/ अयं यत्नः/प्रश्नः।

४०. **याच्ञा स्त्रियाम्।। पूर्वस्यापवादः।**

**सूत्रार्थः**- ''याच्ञा'' शब्दोऽयं स्त्रीलिङ्गे प्रयुज्यते

**व्याख्या**- इदं सूत्रं पूर्वसूत्रस्यापवादः। पूर्वसूत्रेण नङ्प्रत्ययान्तशब्दस्य पुंसि विधानात् ''याच्ञा'' शब्दस्यापि पुंल्लिङ्गे

गणना भवितुं शक्यते, तद्बाधनार्थं मूले आह– पूर्वसूत्रस्यापवादः। अत एव सूत्रस्य अपवादत्वेनात्र स्त्रीत्वं भवति। तेन ''याच्ञा'' याच् धातोः ''यजयाचयतविच्छप्रच्छरक्षो नङ्'' इति सूत्रेण नङ् प्रत्यये कृते सिद्धोऽयं शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति इत्याशयः।

**उदाहरणम्**– इयं याच्ञा।

''याच्ञामोघावरणमधिगुणेनाधमेलब्धकामा''।

४१. **क्यन्तो घुः।। कि प्रत्ययान्तो घुः। पुंसि स्यात्। आधिः। निधिः। उदधिः। क्यन्तः किम्? दानम्। घुः किम्? जज्ञिर्वीजम्।**

**सूत्रार्थः**– कि प्रत्ययान्ताः घुसंज्ञकाः शब्दाः पुल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**– किः अन्ते यस्य सः क्यन्तः। कि प्रत्ययोऽन्तः परो यस्मात् तादृशो घुसञ्ज्ञको धातुस्तद्घटितः शब्दः पुमान् भवति इति। ''दाधाध्वदाप्'' इति सूत्रेण दा, धा अनयोः घुसंज्ञा भवति तदनन्तरं कि प्रत्ययान्तत्वात् अनयोः पुंल्लिङ्गे प्रयोगो भवति।

**उदाहरणानि**– अयं व्याधिः/ निधिः/ उदधिः

**विशेषः** – क्यन्तग्रहणं कथम्– दानम् इति। इत्यत्र दा धातोः घुसंज्ञाभावे सूत्रस्यास्य प्रवृत्तिसम्भवात् पुंस्त्वं यथा न स्यादेतदर्थमत्र क्यन्तग्रहणम्।

'घुः' इति पदस्य ग्रहणं कथम्? जज्ञिर्बीजम्। ननु घुरितिविधानाभावात् 'जज्ञि' इत्यस्य कि प्रत्ययान्तत्वात् पुल्लिङ्गापत्तिस्तत्र भवति घुसंज्ञाभावात् सूत्रे च तस्य विधानादिति।

४२. **इषुधिः स्त्री च।। इषुधि शब्दः स्त्रियां पुंसि च। पूर्वस्यापवादः।**

**सूत्रार्थः** – इषुधिः शब्दः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुक्तो भवति।

**व्याख्या** – सूत्रमिदं पूर्वसूत्रस्यापवादः। पूर्वसूत्रेण क्यन्तघुसंज्ञकस्य पुल्लिङ्गे विधानात् अत्रापि पुंस्त्वस्यैव प्राप्तिः परं तं प्रबाध्यानेन सूत्रेण स्त्रीत्वं पुस्त्वञ्च विहितम्। अत्र ''दाधाघ्वदाप्'' इति सूत्रेण घु संज्ञा। ''कर्मण्यधिकरणे च'' इति सूत्रेण कि प्रत्ययो भवति। अतः क्यन्तघुसंज्ञकत्वेऽपि इषुधिः शब्दोऽयं न केवलं पुंस्त्वे प्रयुक्तो भवति अपितु प्रकृतसूत्रेण पक्षे स्त्रीत्वमपि भवति इत्याशयः।

**उदाहरणानि**– इयम् अयं वा इषुधिः।

४३. **देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुजकण्ठ-खड्ग-शर-पङ्काभिधानानि। एतानि पुंसि स्युः। देवाः सुराः। असुरा दैत्याः। आत्मा क्षेत्रज्ञः। स्वर्गोनाकः। गिरिः पर्वतः। समुद्रोऽब्धिः। नखः कररुहः। केशः शिरोरुहः। दन्तो दशनः। स्तनः कुचः। भुजो दोः। कण्ठो गलः। खड्गः करवालः। शरोमार्गणः। पङ्कः कर्दम् इत्यादि।**

**सूत्रार्थः** – देवासुरेत्यादयः सूत्रोक्ताः शब्दाः तेषां र्पायवाचिनश्च शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**– देवश्च असुरश्च आत्मा च गिरिश्च समुद्रश्च नखश्च केशश्च दन्तश्च स्तनश्च भुजश्च कण्ठश्च खड्गश्च शरश्च पङ्कश्चेति (इतरेतरद्वन्द्वः)। तेषामभिधानानि (द्वन्द्वमूलक तत्पुरुषः) एतेन सूत्रे पठितानां शब्दानां पुंस्त्वमत्रं विहितम्।

**उदाहरणानि**– इमे देवाः सुराः। इमे असुराः, दैत्या। अयम् आत्मा, क्षेत्रज्ञः। स्वर्गः, नाकः। गिरिः पर्वतः। समुद्रः अब्धिः। नखः, कररुहः। केशः, शिरोरूहः। दन्तः, दशनः। स्तनः, कुचः। भुजः, दोः। कण्ठः, गलः। खड्गः, करवालः। शरः, मार्गणः। पङ्कः, कर्दमः।

४४. **त्रिविष्टपत्रिभुवने नपुंसके।। स्पष्टम्। तृतीयं विष्टपं त्रिविष्टपम्। स्वर्गाभिधानतया पुंस्त्वे प्राप्तेऽयमारम्भः।**

**सूत्रार्थः**– त्रिविष्टिप त्रिभुवन इत्येतौ शब्दौ नपुंसकलिङ्गे प्रयुक्तौ स्याताम्।

**व्याख्या**– त्रिविष्टपञ्च त्रिभुवनञ्चेति त्रिविष्टपत्रिभुवने (इतरेतरद्वन्द्वः)। प्रथमाद्विवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तं पदम्। पूर्वसूत्रस्य अपवादसूत्रमिदम्। ''देवासुर–'' इति सूत्रे निर्दिष्टानां शब्दानां तेषां पर्यायाणाञ्च प्रयोगः पुंल्लिङ्गेः निर्दिष्टः, तदनुसारेण अस्मिन् सूत्रे पठितोऽयं त्रिविष्टिप् शब्दः स्वर्गस्य पर्यायोऽस्ति, अतः पुंस्त्वस्य प्राप्तिः भवति परं न स्यादेतदर्थं सूत्रेऽस्मिन् नपुंसकत्वस्य विधानं विहितम्। इदं त्रिविष्टिपम्= स्वर्गः इति।

**उदाहरणानि**– इदं त्रिविष्टिपम्/ इदं त्रिभुवनम्

४५. **द्यौः स्त्रियाम्।। द्योदिवोस्तन्त्रेणोपादानमिदम्।**

**सूत्रार्थः**– 'द्यौः' शब्दः स्त्रीलिङ्गे स्यात्

**व्याख्या** – इदमपि ''देवासुर–'' इति सूत्रस्य अपवादसूत्रम्। द्यौ शब्दः स्वर्गाभिधानवाचकः। अत एव देवासुर'' इति सूत्रेण पुंस्त्वे प्राप्ते तद्बाधनार्थमिदं सूत्रम्। एतेन 'द्यौः' शब्दः स्त्रियां प्रयुक्तो भवति इत्याशयः। द्यौः = स्वर्गः।

**उदाहरणम्**– इयं द्यौः।

४६. **इषुबाहू स्त्रियां च।। चात्पुंसि।**

**सूत्रार्थः** – इषु बाहु इत्येतौ शब्दौ स्त्रियां पुंसि च प्रयुक्तौ स्याताम्।

**व्याख्या**– इषुश्च बाहूश्चेति इषुबाहू (इतरेतद्वन्द्वः)। स्त्रियाम् इति सप्तम्यन्तं विधेयं पदम्। चकारात् पुंल्लिङ्गस्यापि ग्रहणम्। अत एव अर्थोऽयं लभ्यते यत् सूत्रोक्तौ शब्दौ स्त्रीलिङ्गे पुंल्लिङ्गे च भवतः।

**उदाहरणानि**– इयम् अयं वा इषुधिः = शरः। इयम् अयं वा बाहुः = भुजः।

४७. **बाणकाण्डौ नपुंसके च।। चात्पुंसि। त्रिविष्टपेत्यादिचतुः सूत्री देवासुरेत्यस्यापवादः।**

**सूत्रार्थः**– बाण काण्ड इत्येतौ शब्दौ पुंसि नुपंसके च लिङ्गे प्रयुक्तौ भवतः

**व्याख्या**– बाणश्च काण्डश्चेति बाणकाण्डौ (इतरेतरद्वन्द्वः)। पूर्वं देवासुर– इति सूत्रेण शराभिधानवाचकस्य शब्दस्य पुंल्लिङ्गे विधानात् बाणकाण्डौ शब्दौ नित्यं पुंस्त्वे भवेतां परं तद्वारणार्थं पुंस्त्वे नपुंसकत्वे (उभयलिङ्गे) च विधानार्थं सूत्रमिदम्। अत एव शब्दौ इमौ पुंल्लिङ्गे नपुंसकलिङ्गे च भवतः। सूत्रमिदं ''देवासुर.–'' इति सूत्रस्यापवादः। बाणः– शरः काण्डः = शरः।

**उदाहरणानि**– अयम् इयं वा बाणः। अयम् इयं वा काण्डः।

४८. **नान्तः।। अयं पुंसि। राजा। तक्षा। न च चर्मवर्मादिष्वतिव्याप्तिः, मन्द्व्यच्कोऽकर्तरि इति नपुंसकप्रकरणे वक्ष्यमाणत्वात्।**

**सूत्रार्थः**– नकारान्ताः शब्दाः पुंल्लिङ्गे प्रयुज्यन्ते।

**व्याख्या**– न अन्ते यस्य सः नान्तः (बहुव्रीहि समासः) पुंल्लिङ्गस्याधिकारो वर्तते। अत्र सूत्रानुसारेण नान्ताः शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति, अत एव आशङ्क्यते यत् चर्म (चर्मन्) वर्म (वर्मन्) इत्यादिषु प्रयोगेषु अतिव्याप्तिः स्यादिति जिज्ञासायामुच्यते– मन्नन्तः द्वयच्कः शब्दः नपुंसकलिङ्गो भवति इत्यर्थकं ''मन्–द्वयच्कोऽकर्तरि'' इति सूत्रं नपुंसकलिङ्गप्रकरणे वक्ष्यामः इति भावः। अत एव नान्तत्वेनापि मन् प्रत्ययान्तौ चर्म वर्म शब्दौ नपुंसकलिङ्गौ न तु पुल्लिङ्गौ।

**उदाहरणानि** – अयं राजा। अयं तक्षा।

४९. **क्रतुपुरुषकपोलगुल्फमेघाभिधानानि।।क्रतुरध्वरः। पुरुषो नरः। कपोलोगण्डः। गुल्फः प्रपदः। मेघो नीरदः।**

**सूत्रार्थ** – क्रतुपुरुषकपोलादयः शब्दाः तेषां पर्यायाश्च पुंल्लिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**– क्रतुश्चपुरुषश्चकपोलश्चगुल्फश्च मेघश्चेति क्रतुपुरुष कपोल गुल्फमेघाः तेषामभिधानानि

ऋतुपुरुषकपोलगुल्फमेघाभिधानानि (द्वन्द्वगर्भो बहुव्रीहिः)। सूत्रे पठिताः शब्दाः एतेषां पर्यायवाचिनश्च पुंल्लिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- अयं ऋतुः= अध्वरः, पुरुषः= नरः कपोलः=गण्डः, गुल्फः=प्रपद, मेघः=अम्बुदः।

**५०. अभ्रं नपुंसकम्।। पूर्वस्यापवादः।**

**सूत्रार्थः** - अभ्रशब्दो नपुंसकं भवति।

**व्याख्या**- इदं सूत्रं ''ऋतुपुरुष - '' इति सूत्रस्यापवादो मेघाभिधानविषये। अभ्रशब्दः मेघशब्दस्य पर्यायो वर्तते, अतः पुंस्त्वे प्राप्ते तं प्रबाध्य ''अभ्रं नपुंसकम्'' इति सूत्रेण नपुंसकत्वं विधीयते। अत एव मूले उक्तम्- **पूर्वस्यापवादः।**

**उदाहरणानि**- इदमभ्रम्। अभ्रम् = मेघः।

**५१. उकारान्तः।। अयं पुंसि स्यात्। प्रभुः। इक्षुः। 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम्'। 'द्वयोः कपोलावयवे' इति मेदिनिः।'करेणुरिभ्यां स्त्री नेभे' इत्यमरः।एवञ्जातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तं च- लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः इति। एवमन्यत्रापि।**

**सूत्रार्थः**- उकारान्तः शब्दः पुल्लिङ्गो भवति।

**व्याख्या**- उकारो अन्ते यस्य सः उकारान्तः (बहुव्रीहिः)। उकारान्तः पुंसि प्रयुज्यते इति प्रकृतसूत्रस्याशयः। एवं तु 'हनु' शब्दोऽपि उकारान्तत्वात् पुंसि एव यद्यपि स्यात् तथापि 'हनुः' इति शब्द हट्टविलासिन्यां नृत्यारम्भे व्यक्तिवाचि चार्थे स्त्रीलिङ्गेऽपि प्रयुज्यते। मेदिनीकोषकारस्य मतानुसारेण तु 'हनु' शब्दः कपोलवाचकः स्यात्तर्हि पुंसि स्त्रियां च प्रयुक्तो भवति। अमरकोषकारस्य मतानुसारेण 'करेणु' शब्दः यद्यपि उकारान्तः तथापि अयं स्त्रीलिङ्गे नैव प्रयुज्यते। एवमेव 'हनु' 'करेणु' इत्यादयः जातीयकाः शब्दाः यदा विशेषवचनैः आक्रान्ता न भवन्ति तदैव उकारान्तः इति सूत्रेण पुल्लिङ्गा भवन्ति। इदं-हि तथ्यं विद्वज्जनैरपि समर्थितं वर्तते।

तथा हि लिङ्गविशेषविधिव्यापृतो भवति, यदि विधिरयं अपवादेन बाधितो न भवति तर्हि अयं व्यापक एवाङ्गीक्रियते न तु सङ्कुचित इति मूलस्याशयः।

**उदाहरणानि**- अयं प्रभुः। अयं इक्षुः।

**५२. धेनुरज्जु-कुहु-सरयु-तनु-रेणु-प्रियङ्गवः स्त्रियाम्।**

**सूत्रार्थः**- धेनुरज्जवादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**- धेनुश्च रज्जुश्च कुहुश्च सरयुश्च तनुश्च रेणुश्च प्रियङ्गुश्चेति धेनुरज्जुकुहूसरयूतनुरेणुप्रियङ्गवः (इतरेतरद्वन्द्वः) प्रथमान्तबहुवचनपदम्। स्त्रियाम्- इति सप्तम्यन्तं पदम्। उकारान्तः इति सूत्रस्यापवादसूत्रमिदम्। ''धेनुरज्जु.''-

सूत्रेऽस्मिन् वर्णिताः सर्वे शब्दाः उकारान्ताः सन्ति उकारान्तत्वेन पूर्ववर्णितेन ''उकारान्तः'' इति सूत्रेण पुंस्त्वं प्राप्तं भवति परं तं प्रबाध्य प्रकृत सूत्रेण नियम्यते यत् एते शब्दाः स्त्रियामेव भविष्यन्ति।

**उदाहरणानि**- इयं धेनुः। रज्जुः। कुहूः। सरयुः। तनुः। रेणुः। प्रियङ्गुः।

**५३. समासे रज्जुः पुंसि च।। कर्कटरज्वा। कर्कटरज्जुना।**

**सूत्रार्थः**- समासे 'रज्जु' शब्दः पुंसिस्त्रियाञ्च प्रयुज्यते।

**व्याख्या**- सूत्रे चकारात् स्त्रीत्वस्य प्राप्तिः भवति। ''धेनुरज्जु-'' इत्यादिना सूत्रेण रज्जु शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति परं सूत्रमिदं निर्दिशति यत् समासे रज्जुशब्दस्य प्रयोगः स्यात् तर्हि पुंस्त्वं भवति। यदि सामासिकपदं नास्ति तदा तु पूर्वसूत्रेण यथाप्राप्त स्त्रीत्वमेव भवति इति।

**उदाहरणानि**- कर्कटरज्वा (पु.)। कर्कटज्जुना (स्त्री.)।

**५४. शमश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके।।**

**सूत्रार्थः**- शमश्रुजानुवस्वादयः सूत्रे वर्णिताः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या**– श्वश्रु च जानु च स्वादु च अश्रु च जतु च त्रपु च तालु चेति श्मश्रुजानुवस्वाद्वश्रुजतुत्रपुतालूनि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तं पदम्। उकारान्तः इति सूत्रस्यापवादः। अत्र उकारान्तः इति सूत्रेण पुंस्त्वं प्राप्तं भवति परं तं प्रबाध्य ''श्मश्रु जानु.–'' इति सूत्रेण विशेषविधानात् सूत्रोक्ताः शब्दाः नपुंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**– इदं श्मश्रु। जानु। वसु। स्वादु। अश्रु। जतु। त्रपु। तालु।

**५५. वसुचार्थवाचि।।'अर्थवाचि' इति किम्? 'वसुर्मयूखाग्निधनाधिपेषु'।**

**सूत्रार्थः** – अर्थवाची वसुशब्दश्च नपुंसकलिङ्गे प्रयुक्तः स्यात्।

**व्याख्या**– वसुचार्थवाचि सूत्रेऽस्मिन् अर्थवाचीति पदस्य ग्रहणेन तात्पर्यमिदं प्राप्यते यत् वसु शब्दस्य नपुंसकलिङ्गे प्रयोगस्तदा एव भवति यदा स अर्थवाचकः स्यात्, भिन्नार्थवाचकश्चेत्तदा तु वसुशब्दः पुल्लिङ्गेऽपि प्रयुक्तो भवितुं शक्यते। अत एव सूत्रे मूले– 'अर्थवाचीति'' किम्– वसुर्मयुखाग्निधनाधिपेषु। अत्र 'वसुः' पुल्लिङ्गे प्रयुक्तोऽस्ति भिन्नार्थवाचकत्वात्।

**उदाहरणानि**– इदं वसु। (धनम्)

**५६. मुद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च।। चात्पुंसि। अयं मद्गुः, इदं मद्गु।**

**सूत्रार्थः**– मदगुमधुसीध्वादयः शब्दाः पुंसि नपुंसके च लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**– मद्गु च मधु च सीधु च शीधु च सानु च कमण्डलु चेति मद्गुमधुसीधुशीधुसानु– कमण्डलूनि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तपदम्। चकारात् पुंस्त्वमपि अत्र गृह्यते। सूत्रोक्ताः शब्दाः उकारान्ताः सन्ति, तस्मादत्र ''उकारान्तः'' इति सूत्रेण पुंस्त्वे प्राप्ते परमत्र प्रकृतसूत्रेण पक्षे नपुंसकत्वस्यापि विधानं क्रियते अत एते सूत्रे वर्णिताः शब्दाः उभयलिङ्गे (पुनंपुंसके) प्रयुक्ताः सन्तु इत्याशयः।

**उदाहरणानि**– अयं मद्गुः इदं मदगु। मधुः, मधु। सीधुः, सीधु। शीधुः, शीधु। सानुः, सानु। कमण्डलुः, कमण्डलु।

**५७. रुत्वन्तः।। मेरुः। सेतुः।**

**सूत्रार्थः**– रुवर्णान्तः तुवर्णान्तश्च शब्दः पुल्लिङ्गो भवति।

**व्याख्या**– रुश्च तुश्चेति रुतू, रुतू अन्ते यस्य सः रुत्वन्तः (द्वन्द्वमूलक बहुव्रीहिः)।

मेरु– इत्यत्र मि धातोः रु प्रत्यये कृते सिद्धः।

सेतुः – इत्यत्र सि धतोः तुन् प्रत्यये कृते सिद्धः।

रुवर्णान्तत्वात् तुवर्णान्तत्वाच्च उभा एव पुल्लिङ्गे प्रयुक्तौ भवतः।

**उदाहरणानि**– अयं मेरुः। अयं सेतुः।

**५८. दारुकशेरुजतुवस्तुवस्तूनि नपुंसके। रुत्वन्त इति पुंस्त्वस्यापवादः। इदं दारु।**

**सूत्रार्थः**– दारुकशेरुजत्वादयः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**– दारु च कशेरु च जतु च वस्तु च मस्तु चेति दारुकशेरुजतुवस्तूमस्तूनि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तपदम्। नपुंसके– इति सप्तम्यन्तं विधेयं पदम्। सूत्रमिदं ''रुत्वन्तः'' इति सूत्रस्यापवादः। रुप्रत्ययान्तत्वादत्र पुंस्त्वं प्राप्यते परं प्रबाध्य प्रकृतसूत्रेण नपुंसकत्वं विधीयते। ''निरवकाशो हि विधिरपवादः'' इति नियमेन ''दारुकशेरु.–'' इति निरवकाशत्वेन ''रुत्वन्तः'' इति पूर्वसूत्रस्यापवादो वर्तते।

**उदाहरणानि**– इदं दारु। कशेरु । जतु । वस्तु / मस्तु

**५९. सक्तुर्नपुंसके च।। चात्पुंसि। सक्तुः, सक्तु।**

**सूत्रार्थः**– सक्तुशब्दः नपुंसकलिङ्गे प्रयुक्तो स्यात्।

**व्याख्या**– रुत्वन्तः इति सूत्रस्यापवादः। नुपंसके– इति सप्तम्यन्तं पदम्। सक्तुः शब्दोऽयं तु वर्णान्तः, तस्मात्

तुवर्णान्तत्वात् ''रुत्वन्तः'' इति सूत्रेण प्राप्तं पुंस्त्वं प्रबाध्य सक्तुर्नपुंसके च इति सूत्रेण पक्षे नपुंसकत्वं विधीयते। चकारादत्र पुंस्त्वमर्थोऽपि गृह्यते।

**उदाहरणानि**- अयं सक्तुः। इदं सक्तु।

**६०. प्राग्रश्मेरकारान्तः।। रश्मिर्दिवसाभिधानमिति इति वक्ष्यति, ततः प्राक् एतस्मादकारान्त इत्यधिक्रियते।**

**सूत्रार्थः**- अधिकारोऽयम्/ इत ऊर्ध्वं रश्मिदिवसाभिधानानि इत्यतः प्राक् अकारान्तः इत्यधिकृतो वेदितव्यः।

**व्याख्या**- अधिकारसूत्रमिदम्/ तत्र हि लक्षणम् ''स्ववाक्यार्थबोधशून्यत्वे सति स्वोत्तरवाक्यार्थ बोधकम्''। अकारो अन्ते यस्य सः अकारान्तः (बहुव्रीहिः)। अतः रश्मिदिवसाभिधानानि इत्यतः प्राक् ''कंसं चाप्राणिनि'' इति सूत्रपर्यन्तम् ''अकारान्तः'' इत्यस्याधिकारः प्रचलिष्यति इति। तस्मात् अकारान्तशब्दानामेव लिङ्गविधानमिति तात्पर्यम्।

**६१. कोपधः।। कोपधोऽकारान्तः पुंसि स्यात्। स्तबकः। कल्कः।**

**सूत्रार्थः**- ककारोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुक्तो भवति।

**व्याख्या**- क उपधायां यस्य सः कोपधः (बहुव्रीहिः)। उपधायाः स्वरूपम् ''अलोऽन्त्यात् पूर्व उपधा'' इति सूत्रेण स्पष्टम्, तदनुसारेण यस्य शब्दस्य अन्त्यालः पूर्वो वर्णः ककारोऽस्ति सः कोपधः। अतः कोपधोऽकारान्तः शब्दः पुंसि प्रयुक्तो स्यादित्याशयः।

**उदाहरणानि**- अयं स्तबकः। अयं कल्कः।

**६२. चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके।। पूर्वसूत्रापवादः।**

**सूत्रार्थः** - चिबुकशालूकप्रातिपदिकादयः सूत्रवर्णिताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**- चिबुकञ्च शालूकञ्च प्रातिपदिकञ्च अंशुकञ्च उल्मुकञ्चेति चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि (इतरेतरद्वन्द्वः)। प्रथमाबाहुवचनान्तपदम्। नपुंसके- इति सप्तम्यन्तं पदम्।

प्रकृतसूत्रे वर्णिताः शब्दाः कोपधाः अकारान्ताश्च अतः ''कोपधः'' इति सूत्रेणात्र पुंस्त्वे प्राप्ते तं प्रवाध्य चिबुकशालूक- इति सूत्रेण नियम्यते यत् चिबुकादयः शब्दाः नपुंसकलिङ्गे एव प्रयुक्ताः भवन्ति इति। सूत्रमिदं ''कोपधः'' इति सूत्रस्यापवादः।

**उदाहरणानि**- इदं चिबुकम्। शालूकम्। प्रातिपदिकम्। अंशुकम्। उल्मुकम्।

**६३. कण्टकनीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्ड-कपिण्डककटकशण्डककपिटकतालकफलकपुलाकानि नपुंसके च। चात्पुंसि। अयं कण्टकः, इदं कण्टकमित्यादि।**

**सूत्रार्थः**- कण्टकानीकसरकादयः सूत्रोक्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्याः**- कण्टकञ्च अनीकञ्च सरकञ्च मोदकञ्च चषकञ्च मस्तकञ्च पुस्तकञ्च तडाकञ्च निष्कञ्च शुष्कञ्च वर्चस्कञ्च पिनाकञ्च भाण्डकञ्च पिण्डकञ्च कण्टकञ्च शण्डकञ्च पिटकञ्च तालकञ्च फलकञ्च पुलाकञ्चेति कण्टकानीकसरक......... फलकपुलकानि (इतरेतरद्वन्द्वः)। इदं सूत्रं ''कोपधः'' इति सूत्रस्यपवादः। अत्र हि अकारान्तकोपधशब्दानां ''कोपधः'' इति सूत्रेण पुंस्त्वे प्राप्ते तं निषिध्य ''कण्टकानीक.'' इति सूत्रेण पक्षे नपुंसकत्वं विधीयते। अत एव प्रकृतसूत्रे पठिताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्यर्थो लभ्यते।

**उदाहरणानि**- अयं कण्टकः, इदं कण्टकम्। अनीकः, अनीकम्। सरकः, सरकम्। मोदकः, मोदकम्। चषकः, चषकम्। मस्तकः, मस्तकम्। पुस्तकः, पुस्तकम्। तडाकः, तडाकम्। निष्कः, निष्कम्। शुष्कः, शुष्कम्। वर्चस्कः, वर्चस्कम्। पिनाकः, पिनाकम्। भाण्डकः, भाण्डकम्। पिण्डकः, पिण्डकम्। कटकः, कटकम्। शण्डकः, शण्डकम्। पिटकः, पिटकम्। तालकः, तालकम्। फलकः, फलकम्। पुलाकः, पुलाकम्।

**६४. टोपधः।।टोपधोऽकारान्तः पुंसि स्यात्। घटः। पटः।**

**सूत्रार्थः**- टोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुज्यते।

**व्याख्या**- ट उपधायां यस्य सः टोपधः (बहुव्रीहिः) पुल्लिङ्गस्याधिकारो वर्तते। अकारान्तस्य चाधिकारत्वात् टोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुक्तो स्यादित्यर्थो लभ्यते।

**उदाहरणानि**- अयं घटः। अयं पटः

६५. **किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके।। किरीटमित्यादि।**

**सूत्रार्थः**- किरीटमुकुटललाटादयः सूत्रोक्ताः टोपधाकारान्ताः शब्दाः नपुंसकलिङ्गे भवन्ति।

**व्याख्या**- किरीटश्च मुकुटश्च ललाटश्च वटश्च विटश्च शृङ्गाटश्च कराटश्च लोष्टश्चेति किरीटमुकुटललाटवटविटश्रृंगाटकराटलोष्टानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्/ इदं सूत्रं पूर्वसूत्रस्यापवादोऽस्ति। पूर्वं ''टोपधः'' इति सूत्रेण टोपधारकारान्ताः शब्दाः पुल्लिङ्गे विहिताः तं प्रबाध्य 'किरीटमुकुट-' इति सूत्रेण सूत्रे पठिताः सर्वे शब्दाः नपुंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- इदं किरीटम्। मुकुटम्। ललाटम्। वटम्। विटम्। शृंगाटम्। कराटम्। लोष्टम्

६६. **कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च।। चात्पुंसि। कुटः, कुटमित्यादि।**

**सूत्रार्थः**- कुटकूटकपाटादयः सूत्रे पठिताः टोपधाकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या**- कुटश्च कूटश्च कपटश्च कपाटश्च कर्पटश्च नटश्च निकटश्च कीटश्च कटश्चेति कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। चकारः समुच्चयार्थकः। इदं सूत्रं ''टोपधः'' इति सूत्रस्यापवादः। तत्र हि तत्सूत्रेण अकारान्तटोपधशब्दानां पुल्लिङ्गे विधानेन अस्मिन्सूत्रे वर्णितां शब्दानां पुल्लिङ्गे प्राप्ते पक्षेऽनेन सूत्रेण नपुंसकत्वं विधीयते। अतः पुंनपुंसके उभयलिङ्गे एते शब्दाः प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं कुटः, इदं कुटम्। कूटः, कूटम्। कपटः, कपटम्। कवाटः, कवाटम्। कर्पटः, कर्पटम्। नटः, नटम्। निकटः, निकटम्। कीटः, कीटम्। कटः, कटम्।

६७. **णोपधः।। णोपधोऽकारान्तः पुंसि स्यात्। गुणः। गणः। पाषाणः।**

**सूत्रार्थः**- णोपधोऽकारान्ताः शब्दाः पुल्लिङ्गे प्रयुज्यन्ते।

**व्याख्या**- ण उपधायां यस्य सः णोपधः (बहुव्रीहिः) ''अलोऽन्त्यात् पूर्व उपधा'' इति सूत्रानुसारेण अन्त्यादलः पूर्वो वर्णः उपधासंज्ञकः, अतः अकारान्तः शब्दः यदि णोपधः स्यात्तर्हि पुंसि प्रयुक्तो भवेदित्याशयः

**उदाहरणानि**- अयं गुणः। गणः। पाषाणः

६८. **ऋणलवणपर्णतोरणोष्णानि नपुंसके।। पूर्वसूत्रापवादः।**

**सूत्रार्थः**- ऋणलवणपर्णादयः सूत्रोक्ताः णोपध-अकारान्ताः शब्दाः नपुंसकलिङ्गे भवन्ति।

**व्याख्या**- ऋणञ्च लवणञ्च पर्णञ्च तोरणञ्च रणञ्च उष्णञ्चेति ऋणलवणपर्णतोरणोष्णानि (इतरेतरद्वन्द्व)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। इदं सूत्रं ''णोपधः'' इति सूत्रस्यापवादः। तत्र हि वर्ण्यते यत् णोपधाकारान्ताः शब्दाः पुंसि प्रयुक्ताः स्युः तेन अत्रापि सूत्रे वर्णिताः शब्दाः पुंस्येव स्यात्, तन्निवारणर्थमेव ''ऋणलवण.-'' इति सूत्रस्य विधानं कृतम् तदनुसारेण प्रकृतसूत्रे वर्णिताः शब्दाः नपुंसकलिङ्गाः भवन्ति इत्याशयाः।

६९. **कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च। चात्पुंसि।।**

**सूत्रार्थः**- णोपध-अकारान्ताः सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः भवन्ति।

**व्याख्या**- कार्षापणञ्च स्वर्णञ्च सुवर्णञ्च ऋणञ्च चरणञ्च वृषणञ्च विषाणञ्च चूर्णञ्च तृणञ्चेति कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके इति सप्तम्यन्तं पदम्। चकारादत्र पुंस्त्वं गृह्यते। ''णोपधः'' इति सूत्रस्यापवादसूत्रमिदम्। तस्मात् ''णोपधः'' इति सूत्रेण पुंस्त्वे प्राप्ते

तं प्रबाध्य प्रकृत सूत्रेण पक्षे नपुंसकत्वमत्र विधीयते। एवं णकारोपध– अकारान्ता: प्रकृतसूत्रे वर्णिता: शब्दा: नपुंसके पुंसि च प्रयुज्यन्ते इत्याशय:।

**उदाहरणानि**– अयं कार्षापण:, इदं कार्षापणम्। स्वर्ण:, स्वर्णम्। सुवर्ण:, सुवर्णम्। व्रण:, व्रणम्। चरण:, चरणम्। वृषण:, वृषणम्। विषाण:, विषाणम्। चूर्ण:, चूर्णम्। तृण:, तृणम्।

**७०. थोपध:।। रथ:।।**

**सूत्रार्थ**– थकारोपध–अकारान्त: शब्द: पुंसि प्रयुज्यते।

**व्याख्या**– थ उपधायां यस्य स: थोपध: (बहुव्रीहि:)। यथा– 'रथ:' इत्यत्र अन्त्यात् पूर्ववर्णस्योपधासंज्ञकत्वात् थकारोऽत्र उपधासंज्ञकोऽस्ति। तस्मात् रथ: पुंसि प्रयुक्तो स्यात्।

**उदाहरणम्**– अयं रथ:।

**७१. काष्ठपृष्ठसिक्थोक्थानि नपुंसके। इदं काष्ठमित्यादि।**

**सूत्रार्थ:**– थोपध–अकारान्ता: काष्ठपृष्ठादय: सूत्रोक्ता: शब्दा: नपुंसकलिङ्गे प्रयुक्ता: स्यु:।

**व्याख्या**– काष्ठञ्च पृष्ठञ्च सिक्थञ्च उक्थञ्चेतित काष्ठपृष्ठसिक्थोक्थानि (इतरेतरद्वन्द्व:)। इदं सूत्रं ''थोपध:'' इति सूत्रस्यापदसूत्रम्। थोपध– अकारान्तशब्दस्य ''थोपध:'' इति सूत्रेण पुल्लिङ्गे विधानात् काष्ठपृष्ठादीनामपि पुस्त्वे प्राप्ते नपुंसकत्वं विधानार्थमिदं सूत्रम्। अत एव सूत्रोक्ता: काष्ठपृष्ठादय: शब्दा: नपुंसकलिङ्गा: भवन्ति इत्याशय:।

**उदाहरणानि**– इदं काष्ठम्। पृष्ठम्। सिक्थम्। उक्थम्।

**७२. काष्ठा दिगर्था स्त्रियाम्।। इमा: काष्ठा:।**

**सूत्रार्थ:**– थोपध: दिगर्थ: 'काष्ठा' शब्द: स्त्रीलिङ्गे प्रयुज्यते।

**व्याख्या**– दिक् अर्थ: यस्या सा दिगर्था (बहुव्रीहि:)। 'स्त्रियाम्' इति सप्तम्यन्तं पदम्। ''थोपध:'' इति सूत्रेण थकारोपध: पुंसि प्रयुक्तो भवति, तदनुसारेणात्रापि पुंस्त्वे प्राप्ते तं प्रबाध्य ''काष्ठा दिगर्था स्त्रियाम्'' इत्यनेन स्त्रीत्वं विधीयते। एवं दिक् वाचक: थोपध: काष्ठा शब्द: स्त्रीलिङ्गे भवति इत्याशय:।

**उदाहरणानि**– इयम् काष्ठा। इमा: काष्ठा:।

**७३. तीर्थ- प्रोथ- यूथ-गाथानि नपुंसके च।। चात्पुंसि। अयं तीर्थ:। इदं तीर्थम्।**

**सूत्रार्थ:**– तीर्थप्रोथयूथादय: थकारोपधा: अकारान्ता: शब्दा: नपुंसके पुंसि च प्रयुज्यन्ते।

**व्याख्या**– तीर्थञ्च प्रोथञ्च यूथञ्च गाथञ्चेति तीर्थप्रोथयूथगाथानि (इतरेतरद्वन्द्व:)। प्रथमाबहुवचनान्तपदम्। नपुंसके– इति सप्तम्यन्तं पदम्। चकार: समुच्चयार्थक:। चकारादत्र पुंस्त्वं गृह्यते। ''थोपध:'' इति सूत्रस्य अपवादसूत्रम्। ''थोपध:'' इति सूत्रेणात्रापि पुंस्त्वं प्राप्तं भवति तं प्रबाध्य पक्षे नपुंसकत्वविधानार्थं सूत्रमिदमुपस्थितम्। तेन सूत्रोक्ता: तीर्थप्रोथादय: शब्दा: नपुंसके पुंसि च प्रयुक्ता: भवन्ति इत्याशय:।

**७४. नोपध:।।अदन्त: पुंसि। इन:। फेन:।**

**सूत्रार्थ:**– नोपधोऽकारान्त: शब्द: पुंसि प्रयुज्यते।

**व्याख्या**– न उपधायां यस्य स: नोपध: (बहुव्रीहि:)। ''अलोन्त्यात्पूर्व उपधा'' इति सूत्रनियमेन अन्त्यादल: पूर्ववर्ण: एव उपधा, स: वर्ण: नकार:, अत एव नोपध: इति। एवं नोपधोऽकारान्त: पुल्लिङ्गे प्रयुक्तो भवति इत्याशय:।

**उदाहरणानि**– अयम् इन:। अयम् केन:।

**७५. जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके।। पूर्वस्यापवाद:।**

**सूत्रार्थ:**– जघनाजिनतुहिनादयो नोपधाकारान्ता: शब्दा: नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या**– जघनञ्च, अजिनञ्च, तुहिनञ्च, काननञ्च वनञ्च, वृजिनञ्च, विपिनञ्च, वेतनञ्च, शासनञ्च, सोपानञ्च, मिथुनञ्च, श्मशानञ्च, रत्नञ्च, निम्नञ्च चिह्नञ्चेति जघनाजिन.............चिह्नानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। नोपधः इति सूत्रस्यापवादोऽयम्। जघनाजिन- इति सूत्रस्योदाहरणेषु ''नोपधः'' इति सूत्रेण पुंस्त्वं प्राप्तं भवति तद्वारणार्थं प्रकृतसूत्रमत्रोपस्थाप्यते। एतदनुसारेण सूत्रोक्ताः शब्दाः नपुंसकलिङ्गाः भवन्ति इति नियम्यते।

**उदाहरणानि**– इदं जघनम्। अजिनम्। तुहिनम्। काननम्। वनम्। वृजिनम्। विपिनम्। वेतनम्। शासनम्। सोपानम्। मिथुनम्। श्मशानम्। रत्नम्। निम्नम्। चिह्नम्।

**७६. मान-यानाभिधान-नलिन-पुलिनोद्यान शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-संभावन-विभावन-विमानानि नपुंसके च।। चात्पुंसि। अयं मानः। इदं मानम्।**

**सूत्रार्थः**– मानयानाभिधानादयः सूत्रोक्ताः नकारोपधाः अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्या** – मानञ्च यानञ्च अभिधानञ्च नलिनञ्च पुलिनञ्च उद्यानञ्च शयनञ्च आसनञ्च स्थानञ्च चन्दनञ्च आलानञ्च समानञ्च भवनञ्च वसनञ्च सम्भावनञ्च विभावनञ्च विमानञ्चेति मानयाना- विमानानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। चकारस्य समुच्चयबोधकत्वात् पुंस्त्वमर्थः बोध्यते। प्रकृतसूत्रं ''नोपधः'' इति सूत्रस्यापवादः।''नोपधः'' इति सूत्रेणात्र नकारोपधत्वात् सर्वेषु उदाहरणेषु पुस्त्वे प्राप्ते तं प्रबाध्य मानयानेत्यादि- सूत्रेण पुंस्त्वं नपुंसकत्वञ्च विहितम्।

**उदाहरणानि**– अयं मानः इदं मानम्। यानः, यानम्। अभिधानः, अभिधानम्। नलिनः, नलिनम्। पुलिनः, पुलिनम्। उद्यानः, उद्यानम्। शयनः, शयनम्। आसनः, आसनम्। स्थानः, स्थानम्। चन्दनः, चन्दनम्। आलानः, आलानम्। समानः, समानम्। भवनः, भवनम्। वसनः, वसनम्। सम्भावनः, सम्भावनम्। विभावनः, विभावनम्। विमानः, विमानम्।

**७७. पोपधः।। अदन्तः पुंसि। यूपः। दीपः। सर्पः।**

**सूत्रार्थः**– पोपधाकारान्ताः शब्दाः पुल्लिङ्गाः भवन्ति।

**व्याख्या**– पकारः उपधायामस्ति यस्य सः पोपधः (बहुव्रीहिः)। ''अलोऽन्त्यात्पूर्व उपधा'' इति सूत्रेण अन्त्यादलः अव्यवहितोत्तरपूर्ववर्णः उपधा भवति। सा उपधा पकारोऽस्ति चेत् ''पोपधः'' इत्युच्यते। एतादृशः पोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुक्तो भवति इत्याशयः। एवं यूपः, दीपः इत्यादयः पुंस्त्वे प्रयुक्ता भवन्ति।

**उदाहरणानि**– अयं यूपः। अयं दीपः।

**७८. पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके। इदं पापमित्यादि।**

**सूत्रार्थः**– पापरूपोडुपादयः पोपधाकारान्ताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या**– पापञ्च रूपञ्च उडुपञ्च तल्पञ्च शिल्पञ्च पुष्पञ्च शष्पञ्च समीपञ्च अन्तरीपञ्चेति पापरूप- समीमान्तराणि (इतरेतरद्वन्द्वसमासः) प्रथमाबहुवचनान्तपदम्। नपुंसके- इति सप्तम्यन्तं पदम्।''पोपधः'' इति सूत्रेण प्रकृतसूत्रस्योदाहरेणषु पुस्त्वे प्राप्ते तं प्रबाध्य ''पापरूपो-'' इति सूत्रेण नपुंसकत्वं विधीयते। अत एव सूत्रमिदं ''पोपधः'' इति सूत्रस्यापवादः।

**उदाहरणानि**– इदं पापम्। रूपम्। उडुपम्। तल्पम्। शिल्पम्। पुष्पम्। शष्पम्। समीपम्। अन्तरीपम्।

**७९. शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च।। अयं शूर्पः, इदं शूर्पमित्यादि।**

**सूत्रार्थः**– शूर्पकुतुपकुणपादयः पोपधाकारान्ताः सूत्रे वर्णिताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या**– शूर्पञ्च कुतुपञ्च कुणपञ्च द्वीपञ्च विटपञ्चेति शूर्पकुतपकुणपद्वीपविटपानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके इति सप्तम्यन्तं पदम्। चकारात् पुंस्त्वमपि गृह्यते। इदं सूत्रं ''पोपधः'' इति सूत्रस्यापवादः। अत्र प्रकृतसूत्रस्य शूर्पकुतपकुणुपादयः शब्दाः ''पोपधः'' इति सूत्रेण पुंस्येव स्युः, तन्निवारणार्थं पक्षे नपुंसकत्वं

विधानार्थसूत्रमिदमुपस्थाप्यते। एतदनुसारेण सूत्रोक्ताः शूर्पकुतुपकुणुपादयः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**– अयं शूर्पः, इदं शूर्पम्। कुतुपः, कुतुपम्। कुणपः, कुणपम्। द्वीपः, द्वीपम्। विटपः, विटपम्।

**८०. भोपधः।। स्तम्भः। कुम्भः।**

**सूत्रार्थः**– भोपधाकारान्ताः शब्दाः पुल्लिङ्गाः भवन्ति।

**व्याख्या**– भकारः उपधायां यस्य सः भोपधः (बहुव्रीहिसमासः)। ''अलोऽन्त्यात्पूर्व उपधा'' इति सूत्र नियमेन सः एव भोपधः वाच्यः यस्मिनन्त्यलाव्यवहितपूर्वत्वविशिष्टो वर्णः भकारः स्यात्। अत एव भकारोपधा अकारान्ताः शब्दाः पुल्लिङ्गाः भवन्ति। इत्याशयः।

**उदाहरणानि**– अयं स्तम्भः। अयं पूम्भः।

**८१. तलभं नपुंसकम्।। पूर्वस्यापवादः।**

**सूत्रार्थः**– भोपधोऽकरान्तः 'तलभशब्दः' नपुंसके प्रयुज्यते।

**व्याख्या**– ''भोपधः'' इति सूत्रेणात्रापि ''तलभ'' शब्दोऽयं पुंसि प्रयुक्तो स्यात् परं तन्निवार्य नपुंसकविधानार्थं ''तलभं नपुंसकम्'' सूत्रमिदमुपस्थाप्यते, तदनुसारेण नपुंसकलिङ्गे एतस्य प्रयोगो भवति। ''इदं तलभम्'' इत्याशयः। ''भोपधः'' इति सूत्रस्यापवादसूत्रमिदम्।

**उदाहरणम्**– इदं तलभम्।

**८२. जृम्भं नपुंसके च।। जृम्भम्। जृम्भः।**

**सूत्रार्थः**– भोपधोऽकारान्तः 'जृम्भ' शब्दः पुंसि नपुंसके च प्रयुज्यते।

**व्याख्या**– ''भोपधः'' इति सूत्रस्य अपवादोऽयम्। अत एव ''भोपधः'' इति सूत्रेण प्राप्तं पुंस्त्वं प्रबाध्य पक्षे नपुंसकत्वमनेन विधीयते। अत एव उभयलिङ्गे पुंसि नपुंसके च प्रयुक्तो भवति ''जृम्भ'' शब्दः इत्याशयः।

**उदाहरणम्**– अयं जृम्भः, इदं जृम्भम्।

**८३. मोपधः।। सोमः। भीमः।**

**सूत्रार्थः**– मोपधोऽकारान्तः शब्दः पुंसि प्रयुज्यते।

**व्याख्या**– मकारः उपधायां यस्य सः मोपधः (बहुव्रीहिः)। अलोऽन्त्यात् पूर्व उपधा इति सूत्रानुसारेण यथा ''सोम'' इति शब्दे अन्त्यालस्ति अकारः, तत्पूर्वं मकारस्योपधासंज्ञकत्वात् मोपधोऽयं शब्दः पुल्लिङ्गे प्रयुक्तो भवति इत्याशयः। एवमेव भीमादयेष्वपि भवति।

**उदाहरणानि्**– अयं सोमः। अयं भीमः।

**८४. रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके। इदं रुक्ममित्यादि।**

**सूत्रार्थः**– रूक्मसिध्मयुध्मादयः सूत्रोक्ताः शब्दाः नपुंसकलिङ्गे प्रयुक्ता भवन्ति।

**व्याख्या**– रूक्मञ्च सिध्मञ्च युध्मञ्च इध्मञ्च गुल्मञ्च अध्यात्मञ्च कुङ्कुमञ्चेति रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तं पदम्। 'मोपधः' इति सूत्रेण मोपधोऽकारान्तस्य पुल्लिङ्गविधानं कृतं तदनुसारेण ''रूक्मसिध्म............नपुंसके'' अस्मिन् सूत्रे वर्णिताः शब्दाः पुंसि एव प्रयुक्ताः स्युः, परं न अत एव नपुंसकविधानार्थमिदं सूत्रमत्रोपस्थाप्यते। एतदनुसारेण सूत्रोक्ताः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इत्याशयः। सूत्रमिदं ''मोपधः'' इति सूत्रस्यापवादो वर्तते।

**८५. संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च।। चात्पुंसि। अयं संग्रामः, इदं संग्रामम्।**

**सूत्रार्थः**– संग्रामदाडिमकुसुमादयः सूत्रोक्ताः मोपधाः अकारान्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः स्युः।

**व्याख्या**– संग्रामञ्च दाडिमञ्च कुसुमञ्च आश्रमञ्च क्षेमञ्च क्षौमञ्च होमञ्च उद्दामञ्चेति

संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि (इतरेतरद्वन्द्वः)। सूत्रमिदं ''मोपधः'' इति सूत्रस्यापवादः। सूत्रे चकारग्रहणेन पुंस्त्वस्यानुवृत्तिरायाति। तथा हि ''संग्रामदाडिम.'' अस्मिन् सूत्रे पठिताः शब्दाः अकारोपधत्वात् ''मोपधः'' इति सूत्रेण पुंस्त्वे प्रयुक्ताः सन्तु परं तन्निवार्य ''निरवकाशो हि विधिरपवादः'' इति नियमेन ''संग्रामदाडिम.'' इति अपवादसूत्रेण पक्षे नपुंसकत्वं विधीयते। तस्मादर्थोऽयं लभ्यते यत् प्रकृतसूत्रे वर्णिताः मोपधा अकारान्ताः शब्दाः पुन्नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**– अयं संग्रामः, इदं संग्रामम्। दाडिमः, दाडिमम्। कुसुमः, कुसुमम्। आश्रमः, आश्रमम्। क्षेमः, क्षेमम्। क्षौमः, क्षौमम्। होमः, होमम्। उद्दामः, उद्दामम्।

८६. **योपधः।। समयः। हयः।**

**सूत्रार्थः**– यकारोपधा अकारान्ताः शब्दाः पुंसि प्रयुक्ताः स्युः।

**व्याख्या**– यकारः उपधायामस्ति यस्य सः योपधः। (बहुव्रीहि समासः) ''अलोऽन्त्यात् पूर्व उपधा'' इति सूत्रेण अन्त्यादलः अव्यवहितपूर्वो वर्णः उपधा सञ्ज्ञको भवति, तदनुसारेण 'समयः' इत्यत्र यकारः उपधासञ्ज्ञोऽस्ति अकारान्तोऽपि च। अत एव शब्दोऽयं पुल्लिङ्गे प्रयुज्यते। एवमेव अन्येषां विषयेऽपि ध्यातव्यः।

**उदाहरणानि**– अयं समयः। अयं हयः।

८७. **किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके।। स्पष्टम्।**

**सूत्रार्थः**– योपधाकारान्ताः किसलयहृदयेन्द्रियादयः सूत्रोक्ताः शब्दाः नपुंसके प्रयुक्ताः भवन्ति।

**व्याख्या**– किसलयञ्च हृदयञ्च इन्द्रियञ्च उत्तरीयञ्चेति ''किसलय..............उत्तरीयाणि'' (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। निरवकाशो हि विधिरपवादः इत्यनेन ''योपधः'' इति सूत्रस्यापवादसूत्रमिदम्। यकारोपधत्वात् किसलयहृदयादयः शब्दाः ''योपधः'' इति सूत्रेण पुंस्त्वे प्रयुक्ताः सन्तु, तं प्रवाध्य ''किसलय.'' इति सूत्रेण नपुंसकत्वं विधीयते। अत एव ''किसलयहृदयादय.'' इति सूत्रे वर्णिताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणम्**– इदं किसलयम्। हृदयम्। इन्द्रियम्। उत्तरीयम्।

८८. **गोमयकषायमलयान्वयाव्ययानि नपुंसके च।। गोमयः। गोमयम्।**

**सूत्रार्थः**– गोमय कषायादयः सूत्रे पठिताः योपधाकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः भवन्ति।

**व्याख्या**– गोमयञ्च कषायञ्च मलयञ्च अन्वयञ्च अव्ययञ्चेति गोमयकषाय........व्ययानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके। इति सप्तम्यन्तं पदम्। चकारात् पुंस्त्वमपि भवति। ''योपधः'' इति सूत्रस्य अपवादसूत्रमिदम्। तथा हि ''गोमयकषायमलयान्वयाव्ययानि नपुंसके च'' सूत्रेऽस्मिन् पठिताः सर्वे शब्दाः ''योपधः'' इति सूत्रेण पुंसि प्रयुक्ताः स्युः, परं तन्निवारणार्थमेव सूत्रमिदमत्र प्रस्तूयते।

एतदनुसारेण गोमयकषायादयः शब्दाः पक्षे नपुंसकत्वमपि भवन्ति। अत एव सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**– अयं गोमयः। इदं गोमयम्। कषायः, कषायम्। मलयः, मलयम्। अन्वयः, अन्वयम्। अव्ययः, अव्ययम्।

८९. **रोपधः।। क्षुरः। अङ्कुरः।**

**सूत्रार्थः**– रोपधोऽकारान्तः शब्दः पुंसि प्रयुज्यते।

**व्याख्या**– र उपधायां यस्य सः रोपधः (बहुव्रीहिसमासः)। अकारान्तस्याधिकारात् रेफोपधोऽकारान्तः शब्दः पुंल्लिङ्गे प्रयुक्तो भवति इत्याशयः। यथा– 'क्षुरः' इत्यत्रान्त्यवर्णोऽस्ति रेफोत्तरवर्त्यकारः, तदव्यवहित पूर्वो वर्णः रेफः, सोऽस्ति उपधात्वेन अतः पुल्लिङ्गवाचकोऽयं शब्दः। एवमेव अन्येषु विषयेष्वपि प्रयोक्तव्यः।

**उदाहरणानि**- अयं क्षुरः। अयं अङ्कुरः।

**९०. द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर-कृच्छ्र-रन्धाश्र-श्वभ्र-भीर-गभीर-क्रूर-विचित्र-केयूर-केदारोदराजस्र-शरीर-कन्दर-पञ्जराजर-जठराजिर-वैर-चामर-पुष्कर-गह्वर-कुटीर-कुलीर-चत्वर-काश्मीर-नीराम्बर-तन्त्र-यन्त्र-क्षत्र-मित्र-कलत्र-चित्र-मूत्र-सूत्र-वक्त्र-नेत्र-गोत्राङ्गुलित्र-भलत्र-शस्त्र-शास्त्र-वस्त्र-पत्र-पात्रच्छत्राणि नपुंसके।। इदं दारमित्यादि।**

**सूत्रार्थः**- सूत्रे वर्णिताः द्वाराग्रस्फारतक्रादयः रेफोपधा अकारान्ताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या**- सूत्रमिदं ''रोपधः'' इति सूत्रस्यापवादः। ''रोपधः'' इति सूत्रेण रोपधोऽकारान्तः पुंल्लिङ्गे प्रयुक्तो भवति। अत एव प्रकृत सूत्रस्य सर्वे शब्दाः द्वाराग्रस्फारादयः पुंस्त्वे प्रयुक्ताः स्युः तन्निवारणार्थमेवात्र इदं सूत्रं पठितम्। तस्मात् ''द्वाराग्रस्कार.-'' इति सूत्रेण नपुंसकत्वमत्र विधीयते।

**उदाहरणानि**- इदं द्वारम्। अग्रम्। स्फारम्। तक्रम्। वक्रम्। वप्रम्। क्षिप्रम्। नारम्। तीरम्। दूरम्। कृच्छ्रम्। रन्ध्रम्। अश्रम्। श्वभ्रम्। भीरम्। गभीरम्। क्रूरम्। विचित्रम्। केयूरम्। केदारम्। उदरम्। अजस्रम्। शरीरम्। कन्दरम्। पञ्जरम्। अजरम्। जठरम्। अजिरम्। वैरम्। चामरम्। पुष्करम्। गह्वरम्। कुहरम्। कटीरम्। कुलीरम् चत्वरम्। काश्मीरम्। नीरम्। अम्बरम्। तन्त्रम्। यन्त्रम्। क्षत्रम्। क्षेत्रम्। मित्रम्। कलत्रम्। चित्रम्। मूत्रम्। सूत्रम्। वक्त्रम्। नेत्रम्। गोत्रम्। अंगुलित्रम्। भलत्रम्। शस्त्रम्। वस्त्रम्। पत्रम्। पात्रम्। छत्रम्।

**९१. शुक्रमदेवतायाम्।। इदं शुक्रं रेतः।**

**सूत्रार्थः**- रोपधोऽकारान्तः ''शुक्र शब्दः'' नपुंसकलिङ्गे प्रयुक्तो भवति देवताभिन्नार्थे।

**व्याख्या**- न देवता अदेवता (नञ्तत्पुरुषसमासः) तस्याम् अदेवतायाम्। देवतभिन्नार्थे इत्यर्थः। इदं सूत्रं ''रोपधः'' इति सूत्रस्यापवादः। ''रोपधः'' इति सूत्रेण रोपधोऽकारान्तः शब्दः पुंस्त्वे प्रयुक्तो कृतः तदनुसारेण ''शुक्र'' शब्दोऽयं रोपधोऽकारान्तत्वात् पुंस्येव स्यात्, तन्निवारणार्थं शुक्रमदेवतायाम् इति सूत्रमुपस्थाप्यते। अत एव ''शुक्र'' शब्दोऽदेवतार्थे नपुंसके प्रयुज्यते इत्याशयः।

**उदाहरणान्**- इदम् शुक्रम् । शुक्रम। रेतः।

**९२. चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशि-शिराणि नपुंसके च।। चात्पुंसि। चक्रः, चक्रमित्यादि।**

**सूत्रार्थः**- चक्रवज्रान्धकारादयः सूत्रोक्ताः रोपधा अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या**- चक्रश्च वज्रश्च अन्धकारश्च सारश्च अवारश्च पारश्च क्षीरश्च तोमरश्च शृंगारश्च भृंगारश्च मन्दारश्च उशीरश्च तिमिरश्च शिशिरश्चेति चक्रवज्र..........तिमिर शिशिराणि (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। चकारात् पुंस्त्वमपि गृह्यते। इदं सूत्रं ''रोपधः'' इति सूत्रस्यापवादो वर्तते। रोपधाकारान्तस्य पुल्लिङ्गे विद्यानत्वेनात्रापि पुस्त्वे प्राप्ते तं प्रवाध्य पक्षे नपुंसकत्वविधानार्थमिदं सूत्रम्/एतदनुसारेण चक्रवज्रान्धकारादयः शब्दाः पुन्नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं चक्रः, इदं चक्रम्। वज्रः, वज्रम्। अन्धकारः, अन्धकारम्। सारः, सारम्। अवारः, अवारम्। पारः, पारम्। क्षीरः, क्षीरम्। तोमरः, तोमरम्। शृंगारः, शृंगारम्। भृंगारः, भृंगारम्। मन्दारः। मन्दारम्। उशीरः, उशीरम्। तिमिरः, तिमिरम्। शिशिरः, शिशिरम्।

**९३. षोपधः।। वृषः। वृक्षः।**

**सूत्रार्थः**- षोपधोऽकारान्तः शब्दः पुंसि प्रयुक्तो भवति।

**व्याख्या**- षकारः उपधायां यस्य सः षोपधः (बहुव्रीहिः)। षोपधः स एव शब्दः यो हि अन्त्यादलः अव्यवहितपूर्ववर्तिनोऽस्ति। यथा ''वृषः'' इत्यत्र अन्त्यवर्णोऽस्ति अकारः, तदव्यवहित पूर्ववर्तिनोऽस्ति षकारः तस्मादेतस्य षोपधत्वात् पुंस्त्वं भवति।

**उदाहरणानि**- अयं वृषः। अयं वृक्षः।

**९४. शिरीर्षजीर्षाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके।**

**सूत्रार्थः**- सूत्रोक्ताः षोपधा अकारान्ताः शिरीषर्जीषाम्बरीषादयः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या**- शिरीषश्च ऋजीषश्च अम्बरीषश्च पीयूषश्च पुरीषश्च किल्बिषश्च कल्माषश्चेति शिरीषशीर्षाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि (इतरेतरद्वन्द्वः)। ''षोपधः'' इति सूत्रस्यापदसूत्रमिदम्। ''षोपधः'' इति सूत्रेण षोपधा अकारान्ताः शब्दाः पुंल्लिङ्गे निर्धारिताः तस्मादत्रापि शिरीर्जीषाम्बरीषादयः शब्दा अपि पुंस्त्वे प्रयुक्ताः स्यु, परं तं प्रवाध्य प्रकृतसूत्रेण शिरीषर्जीषाम्बरीषादयः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इति विधानं कृतम्।

**उदाहरणानि**- इदं शिरीषम्। ऋजीषम्। अम्बरीषम्। पीयूषम्। पुरीषम्। किल्विषम्। कल्माषम्।

**९५. यूषकरीषमिषविषवर्षाणि नपुंसके च।। चात्पुंसि। अयं यूषः। इदं यूषमित्यादि।**

**सूत्रार्थः**- यूषकरीषमिषादयः षोपधा अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या**- यूषश्च करीषश्च मिषश्च विषश्च वर्षश्चेति यूषकरीषमिषवर्षाणि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्/ चकारात् पुंस्त्वमपि गृह्यते।

''षोपधः'' इति सूत्रस्यापवादसूत्रमिदम्। तत्र तेन सूत्रेण षोपधोऽकारन्तः शब्दः पुंस्त्वे प्रयुक्तः। तदनुसारेण ''यूषकरीष- '' इति सूत्रस्थाः सर्वे शब्दाः पुंल्लिङ्गाः स्युः, तं प्रबाध्य पक्षे नपुंसकत्वं प्रकृतसूत्रेण विधीयते। एतदनुसारेण यूषकरीषादयः शब्दाः पुंसि नपुंसके च प्रयुक्ताः भविष्यन्ति इत्याशयः।

**उदाहरणानि**- अयं यूषः, इदं यूषम्। करीषः, करीषम्। मिषः, मिषम्। विषः, विषम्। वर्षः, वर्षम्।

**९६. सोपधः।। वत्सः। वायसः। महानसः।**

**सूत्रार्थः**- सोपधोऽकारान्तः शब्दः पुंसि स्यात्।

**व्याख्या**- स उपधायां यस्य स सोपधः (बहुव्रीहिः)। अलोऽन्त्यात्पूर्व उपधा इति सूत्रेण सोपधः शब्दः स एव भवति यत्र अन्त्यादलः अव्यवहित पूर्ववर्तिनो वर्णः सकारः स्यात्। अत एव ''सोपधः'' इति सूत्रेण वत्सः, वायसः महानस इत्यादिषु प्रयोगेषु सोपधत्वात् पुंस्त्वविधानं क्रियते।

**उदाहरणानि**- अयं वत्सः। वायसः। महानसः।

**९७. पनसबिसबुससाहसानि नपुंसके।**

**सूत्रार्थः**- पनस विसबुसाहसादयः सोपधा अकारान्ताः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या**- पनसञ्च विसञ्च बुसञ्च साहसञ्चेति पनसविसबुससाहसानि (इतरेतरद्वन्द्वसमासः) प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। ''सोपधः'' इति सूत्रस्य अपवादसूत्रमिदम्। ''पनसविसबुस-'' नपुंसके इति सूत्रस्थाः सर्वे शब्दाः सोपधाः सन्ति तस्मादत्रापि ''सोपधः'' इति सूत्रेण पुंस्त्वं प्राप्यते तं प्रबाध्य प्रकृतसूत्रेण नपुंसकत्वं विहितम्। एतेन पनसविसबुससाहसादयः नपुंसकलिङ्गे प्रयुज्यन्त इत्याशयः।

**उदाहरणानि**- इदं पनसम्। विसम्। बुसम्। साहसम्।

**९८. चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसनिनपुंसके च।। इदं चमसम् अयं चमसः इत्यादि।**

**सूत्रार्थः**- चमसांसरसादयः सोपधाः अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्या**- चमसश्च अंसश्च रसश्च निर्यासश्च उपवासश्च कार्पासश्च वासश्च भासश्च कासश्च कांसश्च मांसश्चेति चमसांसरसनिर्यासोपवासकार्पासवासभासकासकांसमांसानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके इति सप्तम्यन्तं पदम्। चकारग्रहणं पुंस्त्वविधानार्थम्। चमसांसरसा...............नुपंसके च' सूत्रेऽस्मिन् पठिताः शब्दाः ''सोपधः'' इति सूत्रस्यार्थेनान्विताः सन्ति, एतस्मात् प्रकृतसूत्रस्यापि सर्वे शब्दाः पुंस्त्वे प्रयुक्ताः स्युः। तन्निषेधार्थमेव सूत्रमिदम त्रोपस्थाप्यते, तेन सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्यर्थो लभ्यते।

**उदाहरणानि**- अयं चमसः। इदं चमसम्। अंसः, अंसम्। रसः, रसम्। निर्यासः, निर्यासम्। उपवासः, उपवासम्। कार्पासः, कार्पासम्। वासः, वासम्। भासः, भासम्। कासः, कासम्। कांसः, कासंम्। मांसः, मांसम्।

**९९. कंसं चाप्राणिनि।। कंसोऽस्त्री पानभाजनम्। प्राणिनि तु कंसो नाम कश्चिद्राजा।**

**सूत्रार्थ**- अप्राणिवाच्यः सोपधोऽकारान्तः 'कंस' शब्दः पुंसि नपुंसके च प्रयुक्तो भवति।

**व्याख्या**- न प्राणी इति अप्राणी तस्मिन् अप्राणिनि (नञ् तत्पुरुष समासः) अप्राणिनि इत्यस्याशयो वर्तते प्राणिभिन्नार्थे इति। कंसम् इति निर्देशात् ''नपुंसके च'' इत्यस्य सम्बन्धः। सूत्रे चकारग्रहणम् अकारान्ताधिकार निवृत्त्यर्थं वर्तते। अत एव सोपधोऽकारान्तः 'कंस'' शब्दः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यते इत्याशयः। प्राणिवाच्ये तु कंसो नाम कश्चिद् राजा इति बोध्यते।

**उदाहरणानि**- अयम् कंसः। इदम् कंसम्।

**१००. रश्मिदिवसाभिधानानि।। एतानि पुंसि स्युः। रश्मिर्मयूखः। दिवसो घस्रः।**

**सूत्रार्थः**- रश्मिदिवस इमौ शब्दौ अनयोरभिधानानि च पुंसि प्रयुज्यन्ते।

**व्याख्या**- रश्मिश्च दिवसश्च रश्मिदिवसौ अनयोरभिधाना नीति रश्मिदिवसाभिधानानि (द्वन्द्वमूलक तत्पुरुष समासः)। पुंस्त्वस्याधिकारो वर्तते। अभिधानशब्दबलात् सूत्रोक्तानां शब्दानां पर्यायवाचिनोऽपि गृह्यन्ते। अत एव अर्थोऽयं लभ्यते यत् सूत्रोक्तौ शब्दौ, एतयोः पर्यायाश्च पुंल्लिङ्गे प्रयुक्ताः भविष्यन्ति। रश्मिः= मयूखः। दिवसः = घस्रः इति।

**उदाहरणानि**- अयं रश्मिः। अयं दिवसः।

**१०१. दीधितिः स्त्रियाम्।। पूर्वस्यापवादः।**

**सूत्रार्थः**- ''दीधिति'' शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति।

**व्याख्या**- ''दीधितिः स्त्रियाम्'' सूत्रमिदं रश्मिदिवसाभिधानानि इति सूत्रस्यापवादो वर्तते। ''दीधितिः'' शब्दोऽयं ''रश्मिः'' इति शब्दस्य पर्यायो वर्तते तस्मात् पूर्वसूत्रेण पुंस्त्वे प्राप्ते तं प्रबाध्य स्त्रीत्वविधानार्थमिदं सूत्रम्। एतेन ''दीधितिः'' शब्दोऽयं स्त्रीलिङ्गे प्रयुक्तः स्यादित्याशयः। इयं दीधितिः= रश्मिः।

**उदाहरणम**- इयं दीधितिः।

**१०२. दिनाहनी नपुंसके।। अयमप्यपवादः।**

**सूत्रार्थः**- दिन- अहन् इत्यैतो शब्दौ नपुंसकलिङ्गे प्रयुज्येते।

**व्याख्या**- दिनं च अहश्चेति दिनाहनी। इतरेतरद्वन्द्वः। इदं सूत्रं ''रश्मि दिवसाभिधानानि'' इति सूत्रस्यापवादः। तत्र हि दिवसः शब्दः तस्य पर्यायश्च पुंल्लिङ्गे विहितः। तदनुसारेण अत्रापि पुंस्त्वं प्राप्यते तं प्रबाध्य प्रकृतसूत्रेण नुपंसकत्वं विधीयते। अत एव इदं दिनम्, इदम् अहः, इत्यनयोः नपुंसकलिङ्गे प्रयोगो भवति।

**उदाहरणानि**- इदं दिनम्। इदम् अहः।

**१०३. मानाभिधानानि।। एतानि पुंसि स्युः। कुडवः। प्रस्थः।**

**सूत्रार्थः**- मानाभिधानानि पुंल्लिङ्गे प्रयुक्तानि भवन्ति।

**व्याख्या**– मानस्य अभिधानानीति मानाभिधानानि (षष्ठी तत्पुरुष समासः)। मान शब्दस्यार्थः परिमाणः। परिमाणशब्दस्य वाचकौ कुडप्रस्थौ स्तः। ''कुडवः'' पदमिदं ''द्वादशाङ्गलयः परिमाणविशेषः'' इत्यर्थं बोधयति। ''प्रस्थः'' इति द्वात्रिंशत् पलस्य वाचकः। यथा इमौ द्वावपि पुंल्लिङ्गे प्रयुक्तौ भवतः तथैव अन्यान्यपि मानाभिधानानि पुंल्लिङ्गानि भवन्ति इत्याशयः।

**उदाहरणानि**– अयं कुडवः। अयं प्रस्थः।

**१०४. द्रोणाढकौ नपुंसके च। इदं द्रोणम्। अयं द्रोणः।**

**सूत्रार्थः**– द्रोण आढक इमौ शब्दौ पुंसि नपुंसकलिङ्गे च प्रयुक्तौ भवतः।

**व्याख्या**– द्रोणश्च आढकश्चेति द्रोणाढकौ (इतरेतरद्वन्द्वः) नपुंसके– इति सप्तयन्तं पदम्। चकारग्रहणेन पुंस्त्वमपि गृह्यते। द्रोणम् = परिमाणविशेषः। आढकम्– द्रोणस्य चतुर्थांशः।

**अष्टमुष्टिर्भवेत् कुचि कुंचयोऽष्टौ तु पुष्कलम्।**
**पुष्कलानि च चत्वारि, आढकः परिकीर्तितः।।**

''द्रोणाढकौ नुपंसके च'' इदं सूत्रं ''मानाभिधानानि'' इति सूत्रस्य अपवादरूपेण प्रयुक्तमस्ति। अत्रहि ''मानाभिधानानि'' इति सूत्रेण परिमाणवाचकाः शब्दाः यथा पुंस्त्वे प्रयुक्ताः सन्ति तथैव अत्रापि स्युः तन्निषेधार्थमेवात्र सूत्रमिदमुपस्थाप्यते। अत एवं ''द्रोणाढकौ नपुंसके च'' इति सूत्रेण द्रोणशब्दः आढक शब्दश्च पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्तौ स्यातामित्यर्थो लभ्यते।

**उदाहरणानि्**– अयं द्रोणः, इदं द्रोणम्। अयं आढकः, इदं आढकम्।

**१०५. खारी मानिके स्त्रियाम्।। इयं खारी। इयं मानिका।**

**सूत्रार्थः**– खारी मानिका इत्येतौ शब्दौ स्त्रियां प्रयुक्तौ भवतः।

**व्याख्या**– खारी च मानिका चेति खारीमानिके (इतरेतरद्वन्द्वः)। ''मानाभिधानानि'' इति सूत्रस्य अपवादसूत्रमिदम्। तत्र हि सूत्रेण परिमाणविशेषवाचकात् शब्दात् पुंस्त्वं विधीयते तदनुसारेण खारी मानिका आभ्यां शब्दाभ्यामपि पुंस्त्वं प्राप्यते तं प्रबाध्य प्रकृत सूत्रेण स्त्रीत्वं विधीयते। खारी= षोडश द्रोणपरिमाणात्मकं पात्रम्। मानिका = परिमाण विशेषः।

**उदाहरणानि**– इयं खारी। इयं मानिका।

**१०६. दाराक्षतलाजासूनां बहुत्वं च।। इमे दाराः।**

**सूत्रार्थः**– दारा अक्षत लाजा असु इत्येते नित्यं बहुवचनान्ताः शब्दाः पुंसि प्रयुक्ताः स्युः।

**व्याख्या**– दाराश्च अक्षताश्च लाजाश्च असवश्चेति दाराक्षतलाजासवः तेषां दाराक्षतलाजासूनाम्। (इतरेतरद्वन्द्वसमासः) चकारात् पुंस्त्वमत्र गृह्यते। एतेन दाराक्षतादयः सूत्रे पठिताः शब्दाः नित्यं बहुवचनान्ताः पुल्लिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणम्**– इमे दाराः। अक्षताः। लाजाः। असवः।

**१०७. नाड्यपजनोपपदानि व्रणाङ्गपदानि।। यथासंख्यं नाड्याद्युपपदानि ब्रणादीनि पुंसि स्युः। अयं नाडीब्रणः। अपाङ्गः। जनपदः। ब्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम्।**

**सूत्रार्थः**– नाड्यपजयोपपदानि व्रणाङ्गपदानि पुंसि प्रयुज्यन्ते।

**व्याख्या**– नाडी च अप च जनश्चेति नाड्यपजनाः, नाड्यपजनाः उपपदानि सन्ति येषां तानि नाड्यपजनापदानि। (द्वन्द्वमूलक बहुव्रीहिसमासः)। अत्र ''यथासंख्यमनुदेशः समानाम्'' इति सूत्रेण यथासंख्याविधिः स्वीकरणीयः। अतः यथाक्रमेण अन्वयो भवति तदनुसारेण– नाड्यपजनोपपदानि व्रणाङ्गपदानि पुंसि प्रयुक्तानि भवन्ति इत्याशयः।

**उदाहरणानि**– अयं नाडीव्रणः। अपाङ्गः। जनपदः।

**१०८. मरुद्गरुत्तरदृत्विजः। अयं मरुत्।**

**सूत्रार्थः**- मरूत्, गरूत्, उत्तरत्, ऋत्विक्, इत्येते शब्दाः पुंसि प्रयुज्यन्ते।
**व्याख्या**- मरुत् च गरूत च उत्तरत् च ऋत्विक् चेति मरूद्गरूदुत्तरदृत्विजः (इतरेतरद्वन्द्वः)। पुंस्त्वस्याधिकारो वर्तते अतएव सूत्रे पठिताः मरूत्गरूदादयः शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति। इत्याशयः।
**उदाहरणानि**- अयं मरुत्। गरुत्। उत्तरत्। ऋत्विक्।
**१०९. ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः। एते पुंसि स्युः। अयमृषिः।**
**सूत्रार्थः**- ऋषि, राशि, दृति, ग्रन्थि, कृमि, ध्वनि, बलि, कौलि, मौलि, रवि, कवि, कपि इत्येते शब्दाः पुंल्लिङ्गा भवन्ति।
**व्याख्या**- ऋषिश्च राशिश्च दृतिश्च ग्रन्थिश्च कृमिश्च ध्वनिश्च बलिश्च कौलिश्च मौलिश्च रविश्च कविश्च कपिश्चेति ऋषि-राशि-दृति...........कपि मुनयः। इतरेतरद्वन्द्वसमासः। पुंस्त्वस्याधिकारो वर्तते।
**उदाहरणानि**- अयम् ऋषिः। राशिः दृतिः। ग्रन्थिः। कृमिः। ध्वनिः। बलिः। कौलिः। मौलिः। रविः। कविः। कपिः।
**११०. ध्वजगजमुञ्जपुञ्जाः।।एते पुंसि।**
**सूत्रार्थः**- ध्वज, गज, मुञ्ज, पुञ्ज इत्येते शब्दा पुंसि प्रयुज्यन्ते।
**व्याख्या**- ध्वजश्च गजश्च मुञ्जश्च पुञ्जश्चेति ध्वजगजमुञ्जपुञ्जाः। (इतरेतरद्वन्द्वसमासः) पुल्लिङ्गस्याधिकारो वर्तते। एतेन सूत्रे पठिताः सर्वे शब्दाः पुंल्लिङ्गाः भवन्ति इत्याशयः।
**उदाहरणानि**- अयं ध्वजः। गजः। मुञ्जः। पुञ्जः।
**१११. हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः। एते पुंसि। अमरस्तु 'मुहूर्तोऽस्त्रियाम्' इत्याहः।**
**सूत्रार्थः**- हस्त, कुन्त, अन्त, व्रात, वात, दूत, धूर्त, सूत, चूत, मुहूर्त इत्येते शब्दाः पुल्लिङ्गे प्रयुक्ताः स्युः।
**व्याख्या**- हस्तश्च कुन्तश्च अन्तश्च व्रातश्च वातश्च दूतश्च धूर्तश्च सूतश्च चूतश्च मुहूर्तश्चेति हस्तकुन्त..........मुहूर्ताः (इतरेतरद्वन्द्वसमासः)। पुंस्त्वस्याधिकारो वर्तते। तथा हि सूत्रे वर्णिताः सर्वे शब्दाः पुंसि प्रयुक्ताः भवन्ति इत्याशयः।
**उदाहरणानि**- अयं हस्तः। कुन्तः। अन्तः। व्रातः। वातः। दूतः। धूर्तः। सूतः। चूतः। मुहूर्तः।
**११२. षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः।।अयं षण्डः।**
**सूत्रार्थः**- षण्डमण्डकरण्डादयः सूत्रे पठिताः शब्दाः पुंसि प्रयुज्यन्ते।
**व्याख्या**- षण्डश्च मण्डश्च करण्डश्च भरण्डश्च वरण्डश्च तुण्डश्च गण्डश्च मुण्डश्च पाषण्डश्च शिखण्डश्चेति षण्डमण्ड...............शिखण्डाः (इतरेतरद्वन्द्वः) पुंल्लिङ्गस्याधिकारो वर्तते। एतेन सूत्रोक्ताः सर्वे शब्दाः पुंल्लिङ्गाः भवन्ति इत्याशयः।
**उदाहरणानि**- अयं षण्डः। मण्डः। करण्डः। भरण्डः। वरण्डः। तुण्डः। गण्डः। मुण्डः। पाषाण्डः। शिखण्डः।
**११३. वंशांशपुरोडाशः।। अयं वंशः। पुरोदाश्यतेपुरोडाशः। कर्मणि घञ्। भवव्याख्यानयोः प्रकरणे 'पौरोडाशपुरोडाशात्ष्ठन्' इति विकार प्रकरणे 'व्रीहे पुरोडाशे' इति च निपातनात् प्रकृतसूत्र एव निपातनाद्वा दस्यडत्वम्। पुरोडाश भुजामिष्टमिति माघः।**
**सूत्रार्थः**- वंश, अंश, पुरोडाश इत्येते शब्दाः पुंसि प्रयुक्ताः स्युः।
**व्याख्या**- वंशश्च अशंश्च पुरोडाशश्चेति वंशांशपुरोडाशाः (इतरेतरद्वन्द्वः) पुंल्लिङ्गस्याधिकारो वर्तते। तेन सूत्रोक्ताः वंशांशादयः शब्दाः पुंल्लिङ्गाः भवन्ति इत्याशयः।
**उदाहरणानि**- अयं वशः। अयं अंशः अयं पुरोडाशः।
**११४. ह्रदकन्दकुन्दबुद्बुदशब्दाः।। अयं ह्रदः।**
**सूत्रार्थः**- ह्रद, कन्द, कुन्द, बुदबुद, शब्द, इत्येते शब्दाः पुंल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्याः**- ह्रदश्च, कन्दश्च, कुन्दश्च, बुदबुदश्च शब्दश्चेति ह्रदकन्दकुन्दबुदबुदशब्दाः (इतरेतरद्वन्द्वः) पुंल्लिङ्गस्याधिकारो वर्तते। तथाहि अर्थोऽयं लभ्यते यत् सूत्रोक्ता शब्दाः पुंसि प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- अयं ह्रदः। कन्दः। कुन्दः। बुदबुदः। शब्दः।

**११५. अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः।। अयमर्घः।**

**सूत्रार्थः**- सूत्रे पठिताः अर्घ, पथिन्, मथिन् ऋभिुक्षिन्, स्तम्ब, नितम्ब, पूग, इत्येते शब्दाः पुंल्लिङ्गा भवन्ति।

**व्याख्या**- अर्घश्च पन्थाश्च मन्थाश्च त्रभुक्षाश्च स्तम्बश्च नितम्बश्च पूगश्चेति ''अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः'' (इतरेतरद्वन्द्वः)। पुंल्लिङ्गस्याधिकारो वर्तत। तस्मात् सूत्रे पठिताः सर्वे शब्दाः पुल्लिङ्गे प्रयुक्ताः स्युरिति।

**उदाहरणानि**- अयं अर्घः। पन्थाः। मन्थाः। ऋभुक्षाः। स्तम्बः। नितम्बः। पूगः।

**११६. पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्ग-समुद्गपुङ्खाः।। अयं पल्ल्व इत्यादि।**

**सूत्रार्थः**- पल्लव, पल्वल, कफ रेफ कटाह निर्व्यूह, मठ, मणि, तरङ्ग, तुरङ्ग, गन्ध, स्कन्ध, मृदङ्ग, सङ्ग, समुद्ग, पुङ्ख, इत्येते शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**- पल्लवश्च पल्वलश्च कफश्च रेफश्च कटाहश्च निर्व्यूहश्च मठश्च मणिश्च तरङ्गश्च तुरङ्गश्च गन्धश्च स्कन्धश्च मृदङ्गश्च सङ्गश्च समुद्गश्च पुङ्खश्चेति पल्लवपल्वल..........समुद्गपुङ्खाः। (इतरेतरद्वन्द्वसमासः)। पुल्लिङ्गस्याधिकारा वर्तते। तदनुसारेण सूत्रे वर्णितानां सर्वेषां शब्दानां पुंल्लिङ्गे प्रयोगो भवति इत्याशयः।

**११७. सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः।। एते पुंसि। अयं सारथिः।**

**सूत्रार्थः**- सारथि, अतिथि, कुक्षि, वस्ति, पाणि, अञ्जलि इत्येते सूत्रपठिताः शब्दाः पुंल्लिङ्गा स्युः।

**व्याख्या**- सारथिश्च अतिथिश्च कुक्षिश्च वस्तिश्च पाणिश्च अञ्जलिश्चेति सारथ्यतिथि...........पाण्यञ्जलयः (इतरेतरद्वन्द्वः) प्रथमान्तबहुवचनान्तं पदमिदम्। पुंल्लिङ्गस्याधिकारो वर्तते। एवं सूत्रे पठिताः सर्वे शब्दाः पुंस्त्वे प्रयुक्ताः भवन्ति इत्याशयः।

**। इति पाणिनीय लिङ्गानुशासने पुंल्लिङ्गप्रकरणम्।**

## अथ नपुंसकाधिकारः

**११८. नपुंसकम्।। अधिकारोऽयम्।**

**सूत्रार्थः** - अधिकारसूत्रमिदम्। 'अक्षमिन्द्रिये' इति सूत्र पर्यन्तमस्याधिकारो वर्तते।

**व्याख्या** - अधिकारो नाम ''स्वदेशे वाक्यार्थशून्यत्वे सत्युत्तरोत्तरफलजनकत्वम्''। अर्थात् 'नपुंसकम्' इति सूत्रतः पश्चात् ''अक्षमिन्द्रिये'' इति सूत्रं यावत्। इत्स्याधिकारो वर्तते।

**११९. भावे ल्युडन्तः।। हसनम्। भावे किम्-पचनोऽग्निः। इध्मप्रव्रश्चनः कुठारः।**

**सूत्रार्थः** - भावे ल्युट् प्रत्ययान्तशब्दः नपुंसकलिङ्गे प्रयुक्तो भवति।

**व्याख्या** - ल्युट् अन्ते यस्य सः ल्युडन्तः (बहुव्रीहिः) ल्युट् इति प्रत्ययः। यथा 'हसनम्' इत्यत्र हस् धातोः 'नपुंसकत्वशिष्टे भावे' ''ल्युट् च'' इति सूत्रेण ल्युटि अनुबन्धलोपे च कृते हस्+यु 'युवोरनाकौ' इति अनादेशे कृते हसन इति जाते ''भावे ल्युडन्तः'' इति सूत्रेण ल्युडन्तः शब्दः नपुंसके प्रयुज्यते तदनुसारेण प्रातिपदिकत्वात् सु विभक्तौ अमादेशे पूर्वरूपे च कृते हसनम् इति भवति। भावे अर्थे एव ल्युट् प्रत्ययान्तो नपुंसकत्वेन प्रयुज्यते तदतिरिक्ते अर्थे ल्युट् प्रत्ययान्तस्य नपुंसकत्वं न भवति। अत एव मूले पठितम् - ''भावे किम्-पचनोऽग्निः''। पच्यते अनेन इति पचनः इत्यत्र ल्युट् प्रत्ययः करणे अर्थे प्रयुक्तोऽस्ति तस्मात् नपुंसकत्वं नास्ति। एवमेव इध्मप्रवश्चन इत्यादि।

**उदाहरणानि** - हसनम्। गमनम्, पठनम्, चलनम् धावनमित्यादीनि।

**१२०. निष्ठा च। भावे या निष्ठा तदन्तं क्लीवं स्यात्। हसितम्। गीतम्।**

**सूत्रार्थः**- भावे निष्ठासंज्ञकः क्तप्रत्ययान्तः शब्दः क्लीबे प्रयुज्यते।

**व्याख्या** - अत्रैतस्मिन् सूत्रे पूर्वसूत्रात् भावे इत्यस्यानुवृत्तिरायाति। चकारात् नपुंसकत्वमर्थः गृह्यते। अत्र हि 'क्तक्तवतू निष्ठा' इति सूत्रेण क्त, क्तवतु इत्येतौ प्रत्ययौ निष्ठासंज्ञौ स्तः। पुनश्च 'निष्ठा' इति सूत्रेण अनयो द्वयोः प्रत्ययोः विधानं क्रियते, तत्रापि ''तयोरेवकृत्यक्तखलर्थाः'' इति नियम्यते यत् क्त प्रत्ययः भावकर्मणोरेव स्यात्, यदा भावे क्त प्रत्ययो भवति तदा प्रकृतसूत्रेण नपुंसकत्वस्य विधानं क्रियते। अत एव अर्थोऽयं लभ्यते यत् भावे निष्ठासंज्ञकस्य क्तप्रत्ययान्तशब्दस्य नपुंसकत्वं भवति।

**उदाहरणानि** - इदं हसितम्। इदं गीतम्

हसितम् - हस् धातोः क्त प्रत्ययेऽनुबन्धलोपे च कृते आर्धधातुकत्वात् इडागमे कृतेऽनुवधलोपे च नपुंसकलिङ्गे प्रथमायाः एकवचने हसितम् इति सिद्धम्।

**गीतम्** - गै धातोः ''आदेच उपदेशेऽशिति'' इति सूत्रेण आत्वे कृते 'घुमास्थागापाजहातिसां हलि'' इति ईत्वे कृते निष्ठायां क्त प्रत्ययेऽनुबन्धलोपे च नपुंसकत्वे प्रथमैकवचने गीतम् इति सिद्धम्।

**१२१. त्वष्यञौ तद्धितौ।। शुक्लत्वम्। शौक्ल्यम्। ष्यञः षित्व सामर्थ्यात्पक्षे स्त्रीत्वम्। चातुर्यम्। चातुरी सामग्रयम्। सामग्री। औचित्यम्। औचिती।**

**सूत्रार्थः** - भावे त्वप्रत्ययान्तः ष्यञ् प्रत्ययान्तश्च तद्धितः शब्दः क्लीबे प्रयुज्यते।

**व्याख्या** - त्वश्च ष्यञश्चेति त्वष्यञौ (इतरेतद्वन्द्वः)।'प्रत्ययग्रहणे तदन्तग्रहणम्' इत्यनेन त्वप्रत्ययान्तः ष्यञ् प्रत्ययान्तश्चेति गृह्यते। भावार्थे तस्य भावस्त्वत्तलौ इत्यनेन त्व प्रत्ययः, ''गुणवचनब्राह्मणादिभ्यः'' इत्यनेन ष्यञ् प्रत्ययश्च भवति। अतः त्वष्यञौ एतौ प्रत्ययौ यदा भावे भवतः तदा निष्पन्नः शब्दः नपुंसकलिङ्गको भवति इत्याशयः। एवं त्वप्रत्ययस्योदाहरणम् - इदं शुक्लत्वम्। ष्यञ् प्रत्ययस्योदाहरणम् - इदं शौकल्यम्। ष्यञ् प्रत्ययस्य षित्वात् ''षिद्गौरादिभ्यश्च'' इति सूत्रेण स्त्रीत्वपक्षे विकल्पेन ङीष् भवति अतः पक्षे चातुर्यमपि भवति। चातुरी इति जायते।

**उदाहरणानि** - इदं शुक्लत्वम्। इदं शौक्ल्यम्। इदं चातुर्यम्। इयं चातुरी।

**१२२. कर्मणि च ब्राह्मणादिगुणवचनेभ्यः।। ब्राह्मणस्य कर्म ब्राह्मण्यम्।**

**सूत्रार्थः** - कर्मणि भावे चार्थे विहिताः 'त्व' प्रत्ययान्ताः ष्यञ् प्रत्ययान्ताश्च ब्राह्मणादिगुवचनशब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** - ब्राह्मणः आदिर्येषान्ते ब्राह्मणादयः ब्राह्मणादयश्च गुणवचनाश्चेति ते ब्राह्मणादिगुणवचनास्तेभ्यः, ब्राह्मणादिगुणवचनेभ्यः (बहुव्रीहिगर्भोद्वन्द्व समासः)। चकारादत्र भावे इत्यर्थस्यानुवृत्तिरायाति। एतेन कर्मणि भावे चार्थे ब्राह्मणादिभ्यः गुणवचनेभ्यश्च शब्देभ्य यौ त्वष्यञौ तद्धितप्रत्ययौ विहितौ तदन्ताः शब्दाः नपुंसकलिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** - (१) ब्राह्मणस्य कर्म भावो वा ब्राह्मणत्वम्, ब्राह्मण्यम्। (२) जडस्य कर्मभावो जडत्वम्, जाड्यम्।

**१२३. यद्-य-ढग् यगञण्वुञ्छाश्च भाव कर्मणि। एतदन्तानि क्लीवानि। ''स्तेनाद्यान्नलोपश्च''। स्तेयम्। सख्युर्यः। सख्यम्। 'कपि ज्ञात्योर्ढक्'। कापेयम्। 'पत्यन्त पुरोहितादिभ्यो यक्' आधिपत्यम्। 'प्राण भृज्जाति वयोवचनोद्गात्रादिभ्योऽञ्।' औष्ट्रम्। 'हायनान्तयुवादिभ्योऽण'। द्वैहायनम्। 'द्वन्द्वमनोज्ञादिभ्यो वुञ्। पिता पुत्रकम्। 'होत्राभ्यश्छः' आच्छावकीयम्। अव्ययी भाव - अधिस्त्रि।**

**सूत्रार्थः** - भावे कर्मणि चार्थे विहिताः यत्, य, ठक्, यक्, अञ्, अण्, छ, इत्येते तद्धितप्रत्ययान्ताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – यच्च यश्च ढक् च यक् च अञ् च अण् च वुञ् च छश्चेति ते यद-य-ढग्-यगञण्-बुञ् छाश्च। इतरेतरद्वन्द्व:। भावे कर्मणि चेत्यर्थ: पूर्व सूत्रात् गृह्यते। अतएव भावे कर्मणि चार्थे उक्तप्रत्ययान्ता: शब्दा: क्लीबे प्रयुज्यन्ते।

**उदाहरणानि – स्तेयम्** – स्तेनस्य भाव: कर्म वा इत्यर्थे स्तेन शब्दात् ''स्तेनाद्यन्नलोपश्च'' इत्यनेन यत् प्रत्ययो नलोपश्च क्रियते स्तेयम्।

**सख्यम्** – सख्यु भाव: कर्म वा इत्यर्थे ''सख्युर्य:'' इति सूत्रेण य प्रत्यये कृते सख्यम् इति।

**कापेयम्** – कपि शब्दात् 'कपिज्ञात्योर्ढक्' इत्यनेन ढक् प्रत्ययेऽनुबन्धलोपे च कृते ढस्य एयादेशे इकारस्य भसंज्ञायां लोपे च कृते आदिवृद्धौ कापेयम् इति।

**आधिपत्यम्** – अधिपति शब्दात् 'पत्यन्तपुरोहितादिभ्यो यक्' इत्यनेन यक् प्रत्ययेऽनुबन्धलोपे च कृते आदिवृद्धौ, इकारस्य भसंज्ञायां लोपे च कृते आधिपत्यम्।

**औष्ट्रम्** – उष्ट्र शब्दात् ''प्राणभृज्जाति वयो वचनोदगात्रादिभ्योऽञ्' इति सूत्रेणाञ् प्रत्ययो विहित: आदिवृद्धौ च औष्ट्रम् इति।

**द्वैहायनम्** – द्विहायन शब्दात् ''हायनान्त युवादिभ्योऽण्'' इति सूत्रेण अण् प्रत्यये, आदिवृद्धौ द्वैहायनम्।

**पितापुत्रकम्** – वुञ् प्रत्यये ''द्वन्द्वमनोज्ञादिभ्यो वुञ्'' इति सूत्रेण वुञि प्रत्यये पितापुत्रकम् इति।

**आच्छावकीयम्** – 'होत्राभ्यश्छ:' इत्यनेन छ प्रत्यये आच्छावकीयम् इति।

एतानि सर्वाणि ''यद्– य ढग् यगञणबुञ्छाश्च'' इति सूत्रेण नपुंसकलिङ्गानि भवन्ति।

**अधिस्त्रि** –'अव्ययीभाव:' इति सूत्रेण अव्ययीभाव समाससम्पन्न: शब्द: 'अधिस्त्रि' इतिवत् नपुंसकलिङ्गो भवति।

**१२४. द्वन्दैकत्वम्। पाणिपादम्।**

**सूत्रार्थ:** – द्वन्द्वसामासिक: एकत्वविशिष्ट: शब्द: नपुंसकलिङ्गे प्रयुज्यते।

**व्याख्या** – द्वन्द्वानामेकत्वमिति द्वन्द्वैकत्वम् (षष्ठीतत्पुरुषसमास:) ''द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्'' इत्यादि द्वन्द्वैकत्वप्रकरणे स्पष्टम्, तत्र येषां द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वसमासघटिता: शब्दा: नपुंसकत्वविशिष्टा: भवन्ति इत्याशय:।

**उदाहरणानि** – इदं पाणिपादम्। इदं शिरोग्रीवम्।

**१२५. अभाषायां हेमन्तशिशिरावहोरात्रे च। स्पष्टम्।**

**सूत्रार्थ:** – हेमन्तशिशिरयोरहोरात्रयोश्च द्वन्द्व: पूर्ववल्लिङो भवत्यभाषायाम्।

**व्याख्या** – न भाषा इति अभाषा तस्याम् अभाषायाम् (नञ्तत्पुरुषसमास:)। हेमन्तश्च शिशिरश्चेति तौ हेमन्तशिशिरौ (इतरेतरद्वन्द्व:)। अहश्च रात्रिश्चेत्यहोरात्रे (इतरेतरद्वन्द्व:)। चकारस्य समुच्चयार्थकत्वात् भाषाभिन्नानामेतेषां द्वन्द्वानां पूर्वशब्दवल्लिङ्गं विधीयते। एतेन ''हेमन्त शिशिरौ' अहोरात्रे अनयो: पदयो: समासात् प्राक् यस्य लिङ्गस्य प्राप्तिरासीत्तदेव लिङ्ग: द्वन्द्वसमासानन्तरमपि भवेदिति आशय:।

**उदाहरणानि** – (१) हेमन्तशिशिरौ–हेमन्तश्च शिशिरश्चेति (२) अहोरात्रे – अहश्च रात्रिश्चेति, अहोरात्रे।

**१२७. अनञ् कर्मधारयस्तत्पुरुष:।। अधिकारोऽयम्।**

**सूत्रार्थ:**– अधिकारोऽयम्। नञ्भिन्न: कर्मधारयभिन्नश्च तत्पुरुषो नपुंसकलिङ्गे प्रयुज्यते।

**व्याख्या** – नञ् च कर्मधारयश्चतौ नञ्कर्मधारयौ, न विद्यते नञ्कर्मधारयौ यस्मिन् स: अनञ्कर्मधारय: (द्वन्द्वमूलकबहुव्रीहि:)। इदं अधिकारसूत्रं वर्तते। अस्याधिकार: 'द्विगु: स्त्रियां च व्यवस्थया' इति सूत्रपर्यन्तं वर्तते। अधिकारस्य स्वभिन्नत्वे सति स्वेतरवाक्यार्थबोधकत्वात् नञ्भिन्न: कर्मधारयभिन्नश्च तत्पुरुष: क्लीबे प्रयुक्तो भवति इति आशय:।

**१२८. अनल्पेछाया।। शरच्छायम्।**

**सूत्रार्थः** – छायान्तः नञ्भिन्नः कर्मधारयभिन्नश्च तत्पुरुषः नपुंसकलिङ्गे प्रयुज्यते बाहुल्येऽर्थे।

**व्याख्या** – न अल्पम् अनल्पम् तस्मिन् अनल्पे अर्थात् बाहुल्ये अर्थे (नञ् तत्पुरुषः)। पूर्वसूत्रात् नञ्भिन्नस्य कर्मधारयभिन्नस्य चाधिकारो वर्तते। अतएव बाहुल्येऽर्थे छायान्तो नञ्कर्मधारयरहितः तत्पुरुषसमासयुक्तः शब्दः प्रकृतसूत्रेण नपुंसकत्वेन प्रयुक्तो भवति इत्याशयः।

**उदाहरणानि** – शरच्छायम् – शरदः छाया इत्यर्थे ''छाया बाहुल्ये'' इति सूत्रेण छायान्ततत्पुरुषस्य नपुंसकत्वे शरच्छायम् इति भवति। इदं शरच्छायम्।

**१२९. राजाऽमनुष्यपूर्वासभा।। इनसभमित्यादि।**

**सूत्रार्थः** – राजपर्यायपूर्वो मनुष्यपूर्वश्च सभान्तः नञ्कर्मधारयरहितः तत्पुरुषः नपुंसकलिङ्गे प्रयुक्तो भवति।

**व्याख्या** – न मनुष्योऽमनुष्यः (नञ् समासः) राजा च अमनुष्यश्चेति राजामनुष्यौ इति (इतरेतरद्वन्द्वः) राजाऽमनुष्यौ पूर्वौ यस्याः सा राजाऽमनुष्यपूर्वा (नञ् द्वन्द्वगर्भो बहुव्रीहिः)। प्रकरणात् नपुंसकस्याधिकारो वर्तते। अत्र राजशब्दः स्वाम्यर्थपरः न तु राज शब्दः पूर्वा इत्यर्थः। अतः कदाचित् राजशब्द पूर्वा तु स्त्रीत्वस्यैव विधानं भवति यथा – राजसभा। स्वाम्यर्थवाचकत्वे तु इदं इनसभम् इति जायते। एवमेव अमनुष्यः शब्दोऽपि राक्षसपिशाचवाचकः न तु अमनुष्य शब्द पूर्वा इत्यर्थकः। अतः रक्षः सभम् इत्येव नपुंसकत्वे भवति न तु अमनुष्यसभम्।

**उदाहरणानि** – इदं इनसभम्। इदं रक्षः सभम्।

**१३०. सुरासेनाच्छायाशालानिशा स्त्रियां च।।**

**सूत्रार्थः**– सुरान्त, सेनान्त, छायान्त, शालान्त, निशान्त इत्येताः नञ् कर्मधारयभिन्नाः तत्पुरुषसमासान्ताः शब्दाः नपुंसके स्त्रियां च प्रयुक्ताः भवन्ति।

**व्याख्या** – सुरा च सेना च छाया च शाला च निशा चेति सुरासेनाच्छायाशालानिशाः (इतरेतरद्वन्द्वः)। स्त्रियामिति सप्तम्यन्तपदम्। चकारात् नपुंसकत्वमर्थो गृह्यते। एतेन स्पष्टोऽयं भवति यत् अनञ्कर्मधारयः तत्पुरुषः नपुंसकलिङ्गे स्त्रीलिङ्गे च प्रयुज्यते। प्रकृतसूत्रस्यायमर्थः ''विभाषा सेनासुराच्छाया शालानिशानाम्'' इत्यस्मिन् सूत्रे विभाषा पदोपादानेन ध्वनितो भवति।

**उदाहरणानि** – इदं यवसुरम्। इयं यवसुरा। ब्राह्मणसेनम्, ब्राह्मणसेना। वटच्छायम्, वटच्छाया। गोशालम्, गोशाला। श्वनिशम्, श्वनिशा।

**१३१. शिष्टं परवत्।। अन्यः तत्पुरुषः परवल्लिङः स्यात्।**

**सूत्रार्थः** – अन्यः तत्पुरुषसमासान्तः शब्दः परवल्लिङ्गो भवति।

**व्याख्या** – उक्तात् अन्यत् शिष्टं वर्तते। अर्थात् तत्पुरुषसमासविषये उक्तादन्यतः तत्पुरुष परवल्लिङ्गो भवतीति सूत्रस्याशयः। यथा – मयूरी च कुक्कुटश्चेति मयूरीकुक्कुटौ इमौ। अर्धं पिपल्याः इति अर्धपिप्पली।

**उदाहरणम्** – इयम् अर्धपिप्पली।

**१३२. रात्राह्नाहाः पुंसि।।**

**सूत्रार्थः** – रात्रान्तः, अह्नान्तः, अहान्तश्च नञ्कर्मधारयरहितः तत्पुरुषः पुल्लिङ्गे प्रयुक्ता भवति।

**व्याख्या** – रात्रिश्च अह्नश्च, अहश्चेति रात्राह्नाहाः। (इतरेतरद्वन्द्वः) पुंसि इति सप्तम्यन्तं विधेयपदं वर्तते। एतेन रात्र, अह्न, अह इत्येवमन्तोऽनञ् कर्मधारयः तत्पुरुषशब्दः पुल्लिङ्गे स्यात्। एतेन सूत्रस्यास्य द्विरात्रेत्याद्युदाहरणेषु 'शिष्टं परवत्' इति सूत्रनियमेन प्राप्तपरवल्लिङ्गतायाः निषेधो भवति तसमात् नपुंसकत्वं न भवति अपितु प्रकृतसूत्रेण पुंस्त्वं विधीयते।

**उदाहरणानि** – अयं द्विरात्रः। पूर्वाह्णः। द्व्यहः।

**१३३. अपथपुण्याहे नपुंसके।।**

**सूत्रार्थः** – 'अपथ' 'पुण्याह' – शब्दाविमौ क्लीबे प्रयुक्तौ भवतः।

**व्याख्या** – अपथञ्च पुण्याहञ्चेति अपथपुण्याहे। इतरेतरद्वन्द्वः। नपुंसके इति सप्तम्यन्तं विधेयंपदं वर्तते। एतेन सूत्रोक्तौ शब्दौ नपुंसकलिङ्गे प्रयुज्येते इति सूत्रस्याशयः।

**उदाहरणानि** – इदम् अपथम्। इदं पुण्याहम्।

**१३४. संख्यापूर्वारात्रिः।। त्रिरात्रम्। संख्या पूर्वेति किम्-सर्वरात्रः।**

**सूत्रार्थः** – संख्यापूर्वो रात्रि शब्दोऽनञ्कर्मधारयस्तत्पुरुषसमासान्तः क्लीबे प्रयुक्तो भवति।

**व्याख्या** – संख्या पूर्वा यस्याः सा सङ्सख्यापूर्वा इति बहुव्रीहिः। प्रकरणानुसारं नपुंसकत्वमत्र गृह्यते। अनञ् कर्मधारयस्तत्पुरुष इत्यस्याधिकारो वर्तते। सूत्रस्य मूले पठितम् – संख्यापूर्वेति किम्? तर्हि अत्र प्रस्तूयते समाधानं यत् संख्या पूर्वेति हेतोरभावे अस्य सूत्रस्य रात्रि शब्दात् पूर्वं संख्यावाचकशब्दस्याभावेऽपि प्रवृत्तिः भवितुमर्हति, अतः सर्वरात्रः इत्यादावपि प्रकृतसूत्रस्य आपत्तिः, तत्रापि नपुंकत्वस्य प्राप्तिः भवति, मा भूत् एतदर्थमेव संख्यापूर्वेति परमावश्यकम्।

**१३५. द्विगुः स्त्रियां च व्यवस्थया।। पञ्चमूली। त्रिभुवनम्।**

**सूत्रार्थः** – द्विगुसमासान्तः शब्दः नपुंसके स्त्रियाञ्च प्रयुज्यते व्यवस्थया।

**व्याख्या** – सूत्रे 'स्त्रियाम्' इति विधेयं सप्तम्यन्तं पदम्। चकारात् नपुंसकत्वस्य ग्रहणमत्र भवति। व्यवस्थया इति पदेन यथाक्रमं, यथाप्रयोगं वा स्त्रीलिङ्गे नपुंसकलिङ्गे वेति तात्पर्यम्। एतेन द्विगुसामासिकः शब्दः नपुंसके स्त्रियाञ्च व्यवस्थया भवतीत्याशयः। 'व्यवस्था' इति पदस्य तात्पर्यं 'स नपुंसकम्' २/४/१७ इत्यादि सूत्रवार्तिकेषु द्रष्टव्यम्।

**उदाहरणानि** – इदं पञ्चगवम्। दन्तोष्ठम्। पञ्चखट्वम्। पञ्चतक्षम्। पञ्चपात्रम्। त्रिभुवनम्। चतुर्युगम्।

इयं पञ्चमूली। पञ्चखट्वी। पञ्चतक्षी। त्रिलोकी।

**१३६. इसुसन्तः। हविः। धनुः।**

**सूत्रार्थः**– इसन्तः उसन्तश्च शब्दः क्लीबे प्रयुज्यते।

**व्याख्या** – इस् च उस् चेति इसुसौ, इसुसौ अन्ते यस्य स इसुसन्तः (द्वन्द्वमूलकबहुव्रीहिः)। विधिसूत्रमिदम्। नपुंसकस्याधिकारो वर्तते। एतेन सूत्रोक्तः शब्दः नपुंसकलिङ्गे प्रयुक्तो भवति इत्याशयः।

**उदाहरणानि** – इदं हविः। इदं धनुः।

**१३७. अर्चिः स्त्रियां च।। इसन्तत्वेऽपि अर्चिः। स्त्रियां नपुंसके च स्यात्। इयमिदं वा अर्चिः।**

**सूत्रार्थः**– 'अर्चिः' शब्दोऽयं नपुंसकलिङ्गे स्त्रियाञ्च प्रयुक्तो भवति।

**व्याख्या** – पूर्वसूत्रस्यापवादसूत्रमिदं वर्तते। पूर्वसूत्रेण इसन्तः उसन्तश्च शब्दः नपुंसके प्रयुक्तः कृतः, तदनुसारेण अत्रापि नपुंसकत्वस्य प्राप्तिः भवति तं प्रबाध्य अनेन सूत्रेणात्र पक्षे स्त्रीत्वमपि विधीयते, तेन 'अर्चिः' शब्दोऽयं उभयोरेव लिङ्गयोः प्रयुक्तो भवति। 'अर्चिः' हि अर्च् धातोः 'अर्चिशुचि हु सृपि छर्दिभ्यः इसि' इति उणादिसूत्रेण इस् प्रत्ययान्तोऽस्ति।

**उदाहरणानि** – इदं अर्चिः। इयं अर्चिः।

**१३८. छदिः स्त्रियामेव।। इयं छदिः। छाद्यतेऽनेनेति छदेश्चुरादिण्यन्ताद् अर्चिशुचि. इत्यादिना इस्। इस्मन्. इत्यादिनाद ह्रस्वः। 'पटलं छदिः' इत्यमरः। तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः।**

**सूत्रार्थः** – 'छदिः' शब्दोऽयं स्त्रियामेव प्रयुक्तः स्यात्।

**व्याख्या** – सूत्रमिदं 'इसुसन्तः' इत्यस्यापवादत्वेन वर्तते। अत एव इसन्तत्वात् प्राप्तं नपुंसकत्वं प्रबाध्य अत्र स्त्रीत्वमत्रानेन सूत्रेण विधीयते। ''स्त्रियाम्'' इति सप्तम्यन्तं विधेयं पदमत्र। सूत्रे 'स्त्रियामेव' इत्यत्र एवकारस्य विषये उच्यते यत् 'स्त्रियाम्' इति विशेषोपादानेनैव नित्यं स्त्रीलिङ्गस्य प्राप्तिरासीत् पुनः एवकारस्तु व्यर्थ एव। तथापि 'पटलं छदिः'

इत्यत्र अमरकोषग्रन्थदर्शनेन साहचर्यात् नपुंसकत्वमपीति भ्रमात्मकं ज्ञानं न स्यात् एतदर्थं प्रकृत सूत्रे एवकार: परमावश्यक:। अतएव मूले लिखितम् –

'अमर व्याख्यातार: उपेक्ष्या:'। छदि धातो: ''अर्चिशुचीत्यादिना'' इस् प्रत्ययान्त: शब्दोऽयं छदि:।

**उदाहरणम्** – इयं छदि:।

**१३९. मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि। एतेषामभिधायकानि क्लीबे स्यु:। मुखमाननम्। नयनं लोचनम्। लोहं कालम्। वनं गहनम्। मांसमामिषम्। रुधिरं रक्तम्। कार्मुकं शरासनम्। विवरं बिलम्। जलं वारि। हलं लाङ्गलम्। धनं द्रविणम्। अन्नमशनम्। अस्यापवादानाह त्रिसूच्या।**

**सूत्रार्थ:** – मुखनयनलोहेत्यादय: शब्दा: एतेषां पर्यायाश्च नपुंसकलिङ्गे प्रयुक्ता: भवन्ति।

**व्याख्या** – मुखञ्च नयनञ्च लोहञ्च वनञ्च मांसञ्च रुधिरञ्च कार्मुकञ्च विवरञ्च जलञ्च हलञ्च धनञ्च अन्नञ्चेति मुख–नयन–लोह–मांस–रुधिर–कार्मुक–विवर–जल–हलं–धन्नान्नानि (इतरेतरद्वन्द्व:) तेषां अभिधानानि (द्वन्द्वगर्भतत्पुरुष:)। नपुंसकस्याधिकारो वर्तते। सूत्रे अभिधानानि इति पदस्य प्रयोगात् सूत्रोक्तशब्दानां पर्यायवाचिनोऽपि गृह्यन्ते। अत एव सूत्रोक्ताशब्दा: तेषां पर्याया: नपुंसकलिङ्गा: भवन्ति इत्याशय:। सूत्रस्यास्य मूले लिखितम् – अस्यापवादानाह त्रिसूत्र्या। अर्थात् 'मुखनयन॰' इत्यादि सूत्रे वर्णितानां शब्दानामपवादस्वरूपा: शब्दा: अग्रे त्रिषु सूत्रेषु प्रकटिता: भविष्यन्ति।

**उदाहरणानि** – मुखम्। नयनम्। लोहम्। वनम्। मांसम्। रुधिरम्। कार्मुकम्। विवरम्। जलम्। हलम्। धनम्। अन्नम्

**१४०. सीरार्थौदना पुंसि।**

**सूत्रार्थ:** – सीर, अर्थ, ओदन इत्येते शब्दा: पुल्लिङ्गा: भवन्ति।

**व्याख्या** – सीरश्च अर्थश्च ओदनश्चेति सीरार्थौदना: (इतरेतरद्वन्द्व:)। सूत्रमिदं पूर्वसूत्रस्यपवाद:। अत्र सीर:–हलम्, अर्थ:=धनम्, ओदन:=अन्नम् इति क्रमेण पर्याया: सन्ति तस्मात् 'सीरार्थोदना:' त्रिषु शब्देषु मुखनयनलोह– इति सूत्रेण नपुंसकत्वस्य प्राप्तिर्भवति परं मा भूत् एतस्मात् अत्र प्रकृत सूत्रेण पुंसत्वस्य विधानं कृतम्। तदनुसारेण एते त्रय: शब्दा: पुल्लिङ्गा: भवन्ति इत्याशय:।

अयं सीर:। अर्थ:। ओदन:।

**१४१. वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च।। वक्त्रो वक्त्रम्। नेत्रो नेत्रम्। अरण्योऽरण्यम्। गाण्डीवो गाण्डीवम्।**

**सूत्रार्थ:**– वक्त्र, नेत्र, अरण्य, गाण्डीव इत्येते शब्दा: नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुज्यन्ते।

**व्याख्या** – वक्त्रञ्च नेत्रञ्च अरण्यञ्च गाण्डीवञ्च इति वक्त्रनेत्रारण्यगाण्डीवानि प्रथमाबहुवचनान्तं पदम् (इतरेतरद्वन्द्वसमास:) चकारात् नपुंसकत्वमर्थोऽपि गृह्यते। इदं सूत्रं ''मुखनयनलोह–'' इति सूत्रस्यापवाद:। तथाहि वक्त्र, नेत्र, अरण्य, गाण्डीव, इत्येते शब्दा: क्रमेण मुखनयनवनकार्मुकाभिधानत्वादत्र 'मुखनयनलोह' इति सूत्रेण नपुंसकत्वमत्र प्राप्यते तं प्रबाध्य प्रकृत सूत्रेणात्र पक्षे पुंसत्वस्य विधानं कृतं तस्मात्–सूत्रोक्ता: शब्दा: पुंनपुंसके प्रयुक्ता: भवन्ति।

यथा – अयं वत्र :। इदं वक्त्रम्। नेत्र:–नेत्रम्। अरण्य:–अरण्यम्। गाण्डीव:–गाण्डीवम्।

**१४२. अटवी स्त्रियाम्।।**

**सूत्रार्थ:**– 'अटवी' शब्दोऽयं स्त्रियां प्रयुज्यते।

**व्याख्या** – 'स्त्रियाम्' इति सप्तम्यन्तं विधेयं पदम्। सूत्रमिदं 'मुखनयनलोह–' इति सूत्रस्यापवादो वर्तते। 'अटवी' शब्दोऽयं वनाभिधानत्वादत्र नपुंसकत्वं 'मुखनयन–' इति सूत्रेण प्राप्यते तं प्रवाध्य 'अटवी स्त्रियाम्' इति सूत्रेण स्त्रीत्वं विहितम्।

**उदाहरणम्** – इयं अटवी।

**१४३. लोपध:।।**

**सूत्रार्थ:**– लोपध: शब्दा: नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – लकार: उपधायां यस्य स: लोपध: (बहुव्रीहि:)। उपधा इति विषये 'अलोऽन्त्यात् पूर्व उपधा' इति सूत्रे स्पष्टम्, तदनुसारेण अन्त्याल: अव्यवहितपूर्ववर्ण: उपधा भवति। एवं यदि उपधायां लकारो भवति तदा तादृश: शब्द: नपुंसकलिङ्ग: भवति इत्याशय:। प्रकरणत्वात् नपुंसकस्याधिकारो वर्तते।

**उदाहरणानि** – इदं कुलम्। कूलम्। स्थलम्।

**१४४. तूलोपलतालकुसूलतरलकम्बलदेवलवृषला: पुंसि।। अयं तूल:।**

**सूत्रार्थ:** – तूलोपलतालादय: सूत्रोक्ता: लोपधा: शब्दा: पुल्लिङ्गे प्रयुक्ता: भवन्ति।

**व्याख्या** – तूलश्च उपलश्च तालश्च कुसूलश्च कम्बलश्च देवलश्च वृषलश्चेति तूलोपलतालकुसूलकम्बलदेवल वृषला: (इतरेतरद्वन्द्व:)। पुंसि इति सप्तम्यन्तं विधेयं पदम्। पूर्वसूत्रस्यापवादो वर्तते। तथाहि 'लोपध:' इति सूत्रेण अत्रापि नपुंसकत्वं प्राप्यते तं प्रबाध्यानेन सूत्रेण पुंस्त्वं विधीयते। अत एव तूलोपलतालादय: शब्दा: पुल्लिङ्गा: भवन्ति इत्याशय:।

**उदाहरणानि** – अयं तूल:। उपल:। ताल:। कुसूल:। कम्बल:। देवल:। वृषल:।

**१४५. शीलमूलमङ्गलसालकमलतलमुसलकुण्डपललमृणालवालनिगलपलालविडालखिलशूला:।। पुंसि च। चात्क्लीबे। इदं शीलमित्यादि।**

**सूत्रार्थ:** – शीलमूलमङ्गलादय: सूत्रोक्ता: शब्दा: क्लीबे पुंसि च प्रयुक्ता: भवन्ति।

**व्याख्या** – शीलश्च मूलश्च मङ्गलश्च सालश्च कमलश्च तलश्च मुसलश्च कुण्डलश्च पललश्च मृणालश्च वालश्च निगलश्च पलालश्च विडालश्च खिलश्च शूलश्चेत्येतेषु शब्देषु इतरेतरद्वन्द्व:। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारात् नपुंसकत्वमत्र गृह्यते। इदं सूत्रं लोपध: इति सूत्रस्यापवादो वर्तते। अतएव 'लोपध:' इति सूत्रेण प्राप्त नपुंसकत्वं प्रबाध्य अनेन सूत्रेण पक्षे पुंस्त्वस्य विधानं विहितम्, तस्मादत्र अर्थोऽयं लभ्यते यत् सूत्रोक्ता: शब्दा: नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुक्ता: भवन्ति इति।

**उदाहरणानि** – इदं शीलम्। अयं शील:। मूलम्-मूल:। मङ्गलम्-मङ्गल:। सालम्-साल:। कमलम्-कमल:। तलम्-तल:। मुसलम्-मुसल:। कुण्डलम्-कुण्डल:। मृणालम्-मृणाल:। वालम्-वाल:। निगलम्-निगल:। पलालम्-पलाल:। विडालम्-विडाल:। खिलम्-खिल:। शूलम्-शूल:।

**१४६. शतादि: संख्या।। शतम्। सहस्रम्। शतादिरिति किम्? एको द्वौ बहव:। संख्येति किम्? शतशृङ्गो नाम पर्वत:।**

**सूत्रार्थ:** – संख्यावाचका: शतादिशब्दा: नपुंसकलिङ्गे प्रयुक्ता: भवन्ति।

**व्याख्या** – शतादिर्यस्य स: शतादि: (बहुव्रीहि: समास:) आदि पदेनात्र सहस्रादय शब्दा: गृह्यन्ते। नपुंसकस्याधिकारो वर्तते। सूत्रे शतादिरिति पदस्य ग्रहणं कथमिति चेत् उच्यते – एक:, द्वौ बहव: इत्यत्रापि प्रकृतसूत्रस्य प्राप्तिर्भवति, तन्निवारणार्थमेवात्र शतादिपदग्रहणमावश्यकम्। संख्येति किमिति चेदुच्यते – ''संख्या इति पदाभावे'' शतश्रृंगो नाम पर्वत: इत्यत्रापि अनेन सूत्रेण नपुंसकत्वस्य विधानं भविष्यति तन्मा भूत् एतदर्थं सूत्रे संख्यापदग्रहणमावश्यकम्।

**उदाहरणानि** – इदं शतम्। इदं सहस्रम्।

**१४७. शतायुत प्रयुता: पुंसि च।। अयं शत:, इदं शतमित्यादि।**

**सूत्रार्थ:**– शत, अयुत, प्रयुत इत्येते संख्यावाचका: शब्दा: नपुंसकलिङ्गे पुंल्लिङ्गे च प्रयुक्ता: भवन्ति।

**व्याख्या** – शतश्च अयुतश्च प्रयुतश्चेति शतायुतप्रयुता: (इतरेतरद्वन्द्व:) प्रथमाबहुवचननान्तं पदम्। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारात नपुंसकत्वत्र गृह्यते। इदं सूत्रं 'शतादि संख्या' इति सूत्रस्यापवादो वर्तते। तेन अत्र प्राप्तनपुंसकत्वं प्रबाध्य प्रकृतसूत्रेण पक्षे पुंस्त्वमपि विधीयते। अतएव सूत्रार्थोऽयं लभ्यते यत् सूत्रोक्ता: शब्दा: नपुंसके पुंसि च प्रयुज्यन्ते इति।

**उदाहरणानि** – अयं शत:। इदं शतम्। अयं अयुत:। इदं अयुतम्। अयं प्रयुत:। इदं प्रयुतम्।

**१४८. लक्षा कोटिः स्त्रियाम्।। इयं लक्षा। इयं कोटिः। 'वा लक्षा नियुतं च तत्' इत्यमरात्क्लीबेऽपि लक्षम्।**
**सूत्रार्थः** – लक्षा कोटि इत्येतौ संख्यावाचकौ शब्दौ स्त्रीलिङ्गे प्रयुज्येते।
**व्याख्या** – 'स्त्रियाम्' इति सप्तम्यन्तं विधेयं पदम्। पूर्वसूत्रेण ''शतादि संख्या'' इत्यनेन नपुंसकविधानात् अपवादस्वरूपेण सूत्रमिदम्। तेन सूत्रोक्तौ शब्दौ नपुंसके न प्रयुक्तौ भवतः अपितु प्रकृतसूत्रेण स्त्रीलिङ्गे प्रयुज्येते। ''लक्षा नियुतं च तदित्यमरात्'' इत्यनेन अमरकोशे लक्षाशब्दः नपुंसकेऽपि प्रयुक्तोऽस्ति। अत एव इदं लक्षमपि भवति। मूले लिखितम् – क्लीबेऽपि लक्षम्।
**उदाहरणानि** – इयं लक्षा। इयं कोटिः।
**१४९. शङ्कुः पुंसि।।**
**सूत्रार्थः** – संख्यावाचकः 'शङ्कुः' शब्दः पुल्लिङ्गे प्रयुक्तो भवति।
**व्याख्या** – ''शतादि संख्या'' इति सूत्रस्यापवादसूत्रमिदम्। तस्मात् 'शतादि संख्या' इति सूत्रेण प्राप्तनपुंसकत्वमत्र न भवति अपितु तं प्रबाध्य प्रकृतसूत्रेण पुंस्त्वं भवति।
**उदाहरणम्** – अयं शङ्कुः।
**१५०. सहस्रः क्वचित।। अयं सहस्रः। इदं सहस्रम्।**
**सूत्रार्थः** – क्वचिदर्थविशेषे संख्यावाचकः 'सहस्र' शब्दः पुंसि क्लीबे च प्रयुक्तो स्यात्।
**व्याख्या** – इदं सूत्रं 'शतादि संख्या इति सूत्रस्यापदरूपेण वर्तते। संख्यावाचकत्वादत्र शतादि संख्या इति सूत्रेण नपुंसकत्वस्य प्राप्तिर्भवति परमत्र प्रकृतसूत्रेण क्वचिदर्थविशेषे 'सहस्र' शब्दः पुल्लिङ्गेऽपि प्रयुज्यते। तेन उभयलिङ्गोऽयं शब्दः 'सहस्रः' ''सहस्रम्'' द्विधा प्राप्यते। यथा – ''सहस्रशीर्षापुरुषः'' इत्यत्र वेदमन्त्रे सहस्र शब्दः अनन्ततायाः वाचकः अत एवार्थविशेषवाचकत्वात् अयं पुल्लिङ्गे प्रयुक्तोऽस्ति।
**उदाहरणानि** – अयं सहस्रः। इदं सहस्रम्।
**१५१. मन्द्वय्च्कोऽकर्तरि। मन्प्रत्ययान्तो द्वयच्कः क्लीबः स्यान्न तु कर्तरि। वर्म। चर्म। द्वयच्कः किम्? अणिमा। महिमा। अकर्तरि किम्, ददाति इति दामा।**
**सूत्रार्थः** – अकर्तरि मनन्तो द्वय्च्कः शब्दः नपुंसकलिङ्गे प्रयुज्यते।
**व्याख्या** – द्वौ अचौ यस्मिन् सः द्वय्च्कः (बहुव्रीहिः)। न कर्ता इति अकर्ता तस्मिन् अकर्तरि (नञ्तत्पुरुषः) अकर्तरि इत्यस्यार्थोऽस्ति कर्तृभिन्ने इति। नपुंसकस्य प्रकरणात् अधिकारो वर्तते। अत एव कर्तृभिन्ने मनन्तः द्वय्च्कः चर्मन् शब्दो नपुंसकत्वेन विधीयते। एवमेव वर्मन् शब्दोऽपि।
**सूत्रे द्वयच्कः किम्** – अत्र उच्यते यत् 'अणिमा' महिमा इत्यादिषु प्रयोगेषु ''मन्द्वय्च्कोऽकर्तरि'' इति सूत्रस्य प्रवृत्तिः मा भूत् तस्मादत्र द्वयच्कः पदस्य ग्रहणमावश्यकम्। 'अणिमा, महिमा' उभौ द्वावपि शब्दौ मन् प्रत्ययान्तौ स्तः।
**अकर्तरि किम्** – अकर्तरि इति पदस्याभावे 'ददाति' इति दामा इत्यत्र प्रकृतसूत्रेण नपुंसकत्वस्य विधानं भवितुमर्हति तन्माभूत् एतदर्थमस्मिन्सूत्रेऽकर्तरीति पदस्य ग्रहणमावश्यकम्।
**१५२. ब्रह्मन् पुंसि च।। अयं ब्रह्मा, इदं ब्रह्म।**
**सूत्रार्थः** – मन्प्रत्ययान्तो 'ब्रह्मन्' शब्दः नपुंसके पुंसि च प्रयुज्यते।
**व्याख्या** – सूत्रेऽस्मिन् मन्प्रत्ययस्य पूर्वसूत्रादनुवृत्तिरायाति। पुंसि – इति सप्तम्यन्तं विधेयं पदम्। चकारात् नपुंसकत्वमत्र गृह्यते। एतेन मन्प्रत्ययान्तोऽयं 'ब्रह्मन्' शब्दः पुन्नपुंसके प्रयुक्तो भवति। 'ब्रह्मन् पुंसि च' इति सूत्रं 'मन् द्वयच्कोऽकर्तरि' इति सूत्रस्यापवादो वर्तते।
**उदाहरणम्** – अयं ब्रह्मा। इदं बह्म।
**१५३. नामरोमणी नपुंसके।। मन्द्वयच्कः। इत्यस्यायं प्रपञ्चः।**

**सूत्रार्थः** – मन्नन्तौ 'नामन्' रोमन् इत्येतौ शब्दौ नपुंसकलिङ्गे प्रयुज्येते।

**व्याख्या** – नाम च रोम चेति नामरोमणी (इतरेतरद्वन्द्वः)। नपुंसके – इति सप्तम्यन्तं विधेयं पदम्। अत्र 'मन् द्वयच्कोऽकर्तरि' इति सूत्रस्य प्राप्तिरासीत् अतः मूले उक्तम् ''मन् द्वयच्कः इत्यस्यायं प्रपञ्चः'' अर्थात् विस्तारमात्रेण प्रयुक्तमिदं सूत्रम्। तथाहि नामरोमणी शब्दाभ्यां नपुंसकत्वमनेन सूत्रेण विधीयते।

**उदाहरणानि** – इदं नाम। इदं रोम।

**१५४. असन्तो द्वयच्कः।। यशः। मनः। तपः। द्वयच्कः किम्? चन्द्रमाः।**

**सूत्रार्थः** – असन्तः द्वयच्कः शब्दो नपुंसकलिङ्गे प्रयुज्यते।

**व्याख्या** – अस् अन्ते यस्य सः असन्तः (बहुव्रीहिः)। द्वौ अचौ यस्मिन् सः द्वयच्कः (बहुव्रीहिः)। नपुंसकस्याधिकारो वर्तते। एतेन असन्तो द्वयच्कः शब्दो नपुंसकलिङ्गो भवति इत्याशयः। द्वयच्कः इति किम्? – सूत्रे 'द्वयच्कः' इति पदस्याभावे 'चन्द्रमाः' इत्यादिप्रयोगेष्वपि अस्य सूत्रस्य प्रवृत्तिः भवितुमर्हति यतो हि शब्दोऽयं अस्प्रत्ययान्तो विद्यते। परं बह्वच्त्वात् प्रकृतसूत्रस्य प्रवृत्तिः न भवति।

**उदाहरणम्** – इदं यशः। मनः। तपः।

**१५५. अप्सराः स्त्रियाम्।। एता अप्सरसः। प्रायेणायं बहुवचनान्तः।**

**सूत्रार्थः** – 'अप्सराः' शब्दोऽयं स्त्रियां प्रयुक्तो भवति।

**व्याख्या** – 'स्त्रियाम्' इति सप्तम्यन्तं विधेयं पदम्। 'अप्सरस्' इति शब्देन सिद्धोऽयं 'अप्सराः' शब्दः बहुवचनान्तं विवक्षितमस्ति, अतएव मूलकाराह – प्रायेणायं बहुवचनान्तः इति। तद्यथा – अप्सराः, अप्सरसौ, अप्सरसः।

**उदाहरणम्** – एताः अप्सरसः।

**१५६. त्रान्तः। पत्रम्। छत्रम्।**

**सूत्रार्थः** – त्रान्तः शब्दः नपुंसके प्रयुज्यते।

**व्याख्या** – त्र अन्ते यस्य सः त्रान्तः (बहुव्रीहिः)। अत्र नपुंसकस्याधिकारो वर्तते। 'ष्ट्रन्' प्रत्ययान्तः शब्दः त्रान्त पदेन व्यवह्रियते। अत एव त्रान्तः शब्दः अनेन सूत्रेण नपुंसकलिङ्गो भवति इत्याशयः।

**उदाहरणानि** – इदं पत्रम्। इदं छत्रम्।

**१५७. यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव।**

**सूत्रार्थः** – यात्रामात्राभस्त्रादयः त्रान्ताः सूत्रे वर्णिताः शब्दाः स्त्रीलिङ्गे एव प्रयुक्ताः भवन्ति।

**व्याख्या** – यात्रा च मात्रा च भस्त्रा च दंष्ट्रा च वरत्रा चेति यात्रामात्राभस्त्रादंष्ट्रावरत्राः (इतरेतरद्वन्द्वः)। स्त्रियाम् इति सप्तम्यन्तं विधेयं पदम्। एव-इति अवधारणात्मकमव्ययपदम्। इदं सूत्रं 'त्रान्तः' इति सूत्रस्यापवादत्वेन वर्तते। अतएव त्रान्तशब्दस्य नपुंसके विधाने सति यात्रामात्राभ्रस्त्रादीनामपि नपुंसकत्वं प्राप्तं भवति तं प्रबाध्य प्रकृतसूत्रेण स्त्रीत्वं विधीयते। अत एव यात्रामात्राभस्त्रादयः शब्दाः स्त्रीलिङ्गाः एव भवन्ति इत्यर्थो लभ्यते।

**उदाहरणानि** – इयं यात्रा। मात्रा। भस्त्रा। दंष्ट्रा। वरत्रा।

**१५८. भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि।। अयं भृत्रः। न मित्रममित्रः। 'तस्य मित्राण्यमित्रास्ते' इति माघः। 'स्यातामिमित्रौ मित्रे च' इति च। यत्तु द्विषोऽमित्रे ( सू. ३१११ ) इति सूत्रे हरदत्तेनोक्तम्-'अमेर्द्विषदित्यौणादिक इत्रच्। अमेरमित्रम्। मित्रस्य व्यथयेदित्यादौ मध्योदात्तस्तु चिन्त्यः। नञ्समासेऽप्येवम्। परवल्लिङ्गतापि स्यादिति तु तत्र दोषान्तरम् इति। तत्प्रकृतसूत्रापर्यालोचनमूलकम्। स्वरदोषोद्भावनमपि नञो जरमरमित्रमृताः पुंसि च ( सू. ८५० ) इति षाष्ठसूत्रास्मरणमूलकमिति दिक्।**

**सूत्रार्थः** – भृत्रामित्रछात्रादयः सूत्रोक्ताः त्रान्ताः शब्दाः पुंसि प्रयुक्ताः भवन्ति।

**व्याख्या** – भृत्रश्च अमित्रश्च छात्रश्च पुत्रश्च मन्त्रश्च वृत्रश्च मेढ्रश्च उष्ट्रश्चेति ''भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः'' (इतरेतरद्वन्द्वः)। 'त्रान्तः' इति सूत्रस्यापवादसूत्रमिदम्। तस्मात् अत्रापि सर्वेभ्यः शब्देभ्यः नपुंसकत्वं प्राप्यते तं प्रबाध्यानेन सूत्रेण पुंस्त्वं विहितम्। पुंसि – इति सप्तम्यन्तं विधेयं पदम्। अत एव सूत्रे वर्णिताः शब्दाः पुल्लिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** – अयं भृत्रः। अमित्रः। छात्रः। पुत्रः। मन्त्रः। वृत्रः। मेढ्रः। उष्ट्रः।

**विशेषः** – लिङ्गविषयकपरम्परायां विशिष्टाः विचाराः प्राप्यन्ते, तथाहि – मित्रं सखा, मित्रश्च सूर्यः। इत्यत्र 'मित्र' शब्दः नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुक्तोऽस्ति। यदा मित्र शब्दे नञ् तत्पुरुषसमासः क्रियते तदा न मित्रमिति 'अमित्रः' इति सिद्धो भवति। एतच्च महाकविमाघेनापि स्वीकृतमुक्तं हि – तस्य मित्राण्यमित्रास्ते इति। एतेन द्विवचनेऽपि न मित्रे इति अमित्रौ, मित्रमिति शब्दस्य द्विवचनेऽपि न मित्रे इति अमित्रौ, मित्रमिति शब्दस्य द्विवचने मित्रे इत्यपि भवति। अयं भट्टोजिदीक्षितानुसृतो विचारः। हरदत्तेन यदुक्तं तस्य समीक्षणे दीक्षितेनोक्तम् – द्विषः शत्रुः (अमित्रः) भवति। द्विषोऽमित्रे इति सूत्रे हरदत्तेन यदुक्तं तत् सिद्धान्तरूपेण नाङ्गीकर्तुं शक्यते, तस्य वचनस्य चिन्त्यरूपत्वात्। यथा – 'अमेर्द्विषत्' इति उणादिसूत्रेण 'अमि' धातोः इत्रच् प्रत्ययेन 'अमित्रम्' इति प्रयोगस्य सिद्धिः भवति। 'मित्रस्य व्यथयेत्' इत्यादौ स्वरस्तु चिन्त्यः वर्तते। ''अमित्रः'' इत्यत्र नञ्समासे कृतेऽपि कार्यसिद्धिर्भविष्यति, तत्र ''परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'' इत्यनेन यत् प्राप्नोति तत्तु तत्र दोषान्तरं भवति इति ''द्विषोऽमित्रे'' इति सूत्रस्य पर्यालोचनेन ज्ञायते। एवञ्च स्वरदोषोद्भावनमपि 'नञोजरयरमित्रमृता' इति सूत्रस्य अष्टाध्यायाः षष्ठाध्याये अस्मरणमूलकमिति।

**१५९. पत्रपात्रपवित्रसूत्रच्छत्राः।। पुंसि च।**

**सूत्रार्थः** – पत्रपात्रपवित्रादयः त्रान्ताः शब्दाः नपुंसके पुंसि च प्रयुज्यन्ते।

**व्याख्या** – पत्रश्च पात्रश्च पवित्रश्च सूत्रश्च छत्रश्चेति ''पत्रपात्रपवित्रसूत्रच्छत्राः''। (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तघटितपदम्। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारात् नपुंसकत्वमत्र गृह्यते। सूत्रमिदं 'त्रान्तः' इति सूत्रस्यापवादत्वेन प्रयुक्तमस्ति। अत एव 'त्रान्तः' इति सूत्रेणात्र प्राप्तनपुंसकत्वं प्रबाध्य ''पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च'' इति सूत्रेण पक्षे पुंस्त्वं विधीयते। अत एव पत्रपात्रादयः सूत्रे पठिताः शब्दाः नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – अयं पत्रः इदं पत्रम्। पात्रः, पात्रम्। पवित्रः, पवित्रम्। सूत्रः, सूत्रम्। छत्रः, छत्रम्।

**१६०. बलकुसुमशुल्वयुद्धपत्तनरणाभिधानानि।। बलं वीर्यम्।**

**सूत्रार्थः** –बलकुसुमशुल्वादयः सूत्रे पठिताः शब्दाः तेषां पर्यायवाचिनश्च नपुंसकलिङ्गाः भवन्ति।

**व्याख्या** – बलं च कुसुमञ्च शुल्वञ्च पत्तनं च रणं चेति बलकुसुमशुल्वपत्तनरणानि तेषामभिधानानि इति बलकुसुमशुल्वपत्तनरणाभिधानानि (द्वन्द्वमूलकतत्पुरुषसमासः)। इदं विधिसूत्रं वर्तते। एतेन बलकुसुमादयः सूत्रोक्ताः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – इदं बलम्। कुसुमम्। शुल्वम्। पत्तनम्। रणम्।

**१६१. पद्मकमलोत्पलानि पुंसि च ।। पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः। अमरोऽप्याह – 'वा पुंसि पद्म नलिनम्' इति। एवं च 'अर्धर्चादिसूत्रे तु जलजे पद्मं नपुंसकमेव' इति वृत्तिग्रन्थो मतान्तरेण नेयः।**

**सूत्रार्थः** – पदम्, कमल, उत्पल इत्येते शब्दाः नपुंसकलिङ्गे, पुंल्लिङ्गे च प्रयुक्ताः भवन्ति।

**व्याख्या** – पद्मञ्च कमलञ्च उत्पलञ्चेति पद्मकमलोत्पलानि (इतरेतरद्वन्द्वः)। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारादत्र नपुंसकत्वस्य ग्रहणं क्रियते। ''बलकुसुमशुल्वपत्तनरणाभिधानानि'' इति सूत्रस्य अपवादसूत्रमिदं वर्तते। तेन कुसुमशब्दस्य पर्यायत्वेनात्र प्राप्तनपुंसकत्वं प्रबाध्य प्रकृतसूत्रेण पक्षे पुंस्त्वस्य विधानं कृतम्। अत एव सूत्रोक्ताः पद्म, कमल, उत्पल, इत्येते शब्दाः क्लीबे पुंसि च प्रयुज्यन्ते इत्याशयः। 'पद्म' शब्दः पुन्नपुंसके प्रयुक्तो भवति इति

कथनस्य समर्थनं अमरकोषकारेणापि कृतम्– ''वा पुंसि पद्म नलिनमिति''। एवञ्चार्धर्चादि सूत्रे जलजे पद्मं नपुंसकमेवेति कथनं मतान्तरेणावगन्तव्यम्।

**उदाहरणानि** – इदं पद्मम्। इयं पद्मः। कमलम्–कमलः। उत्पलम्–उत्पलः।

**१६२. आहव संग्रामौ पुंसि।।**

**सूत्रार्थः** – 'आहव' 'संग्राम' इत्येतौ शब्दौ पुल्लिङ्गे प्रयुक्तौ भवतः।

**व्याख्या** – आहवश्च संग्रामश्चेति आहवसंग्रामौ (इतरेतरद्वन्द्वः) प्रथमाद्विवचनान्तपदम्। ''निरवकाशो हि विधिरपवादः'' इति नियमेन ''आहवसंग्रामौ पुंसि'' सूत्रमिदं 'बलकुसुमशुल्वपत्तनरणाभिधानि' इति सूत्रस्यापवादसूत्रं वर्तते। आहवसंग्रामौ द्वावपि इमौ शब्दौ रणाभिधानौ स्तः, अत एव ''बलकुसुम.'' इति सूत्रेणात्र नपुंसकत्वं प्राप्यते तं प्रबाध्य प्रकृतसूत्रेण पुंस्त्वमत्र विहितम्।

**उदाहरणानि** – अयम् आवहः। अयम् संग्रामः।

**१६३. आजिः स्त्रियामेव।।**

**सूत्रार्थः** – 'आजिः' शब्दोऽयं स्त्रियामेव प्रयुक्तो भवति।

**व्याख्या** – 'आजि' शब्दोऽयं रणवाचको वर्तते। तस्मात् बलकुसुमेत्यादिसूत्रेणात्र नपुंसकत्वं प्राप्यते तं प्रबाध्य 'आजिः स्त्रियामेव' इति सूत्रेण स्त्रीत्वविधानं कृतम्। सूत्रे 'स्त्रियाम्–' इति सप्तम्यन्तं विधेयं पदम्। एवकारो निश्चयार्थको वर्तते। एतेन 'आजि' शब्दः स्त्रियामेव स्यादित्यर्थो प्राप्यते।

**उदाहरणम्** – इयमाजिः।

**१६४. फलजातिः।। फलजातिवाची शब्दो नपुंसकं स्यात्। आमलकम्। आम्रम्।**

**सूत्रार्थः** – फलजातिवाचकः शब्दः नपुंसके प्रयुक्तो भवति।

**व्याख्या** – फलानां जातिः फलजातिरित्यत्र षष्ठीतत्पुरुषः। विधिसूत्रमिदम्।

**उदाहरणानि** – इदम् आम्रम्। इदम् आमलकम्।

**१६५. वृक्षजातिः।। स्त्रियामेव, क्वचिदेवेदम्। हरीतकी।**

**सूत्रार्थः** – वृक्षजातिवाचकः शब्दः स्त्रियामेव प्रयुक्तो भवति।

**व्याख्या** – वृक्षाणां जातिः वृक्षजातिः (ष.त.स.)। वृक्षजातिवाचकाः शब्दाः स्त्रियामेव स्युः। इत्यर्थोत्पादनाय सूत्रे 'एव' पदस्य ग्रहणं वर्तते। एवकारो निश्चयार्थकः इति।

**उदाहरणम्** – इयं हरीतकी।

**१६६. वियज्जगत्सकृत्शकन्पृषच्छकृद्यकृदुदश्वितः।। एते क्लीबाः स्युः।**

**सूत्रार्थः** – वियत्, जगत्, सकृत्, शकन्, पृषत्, शकृत्, उदश्वित् इत्येते शब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – वियच्च जगच्च सकृच्च शकञ्च पृषच्च शकृच्च यकृच्च उदश्विच्चेति वियज्जगत्.........उदश्वितः (इतरेतरद्वन्द्वः)। विधिसूत्रमिदं वर्तते। नपुंसकस्याधिकारो वर्तते। अत एव वियज्जगत्सकृतादयः शब्दाः नपुंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इदं वियत्। जगत्। सकृत्। शकन्। पृषत्। शकृत्। यकृत्। उदश्वित्।

**१६७. नवनीतावनताननृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि।।**

**सूत्रार्थः** – नवनीतावनतानृतादयः सूत्रपठिताः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या** – नवनीतञ्च अवनतञ्च अनृतञ्च अमृतञ्च निमित्तञ्च वित्तञ्च चित्तञ्च पित्तञ्च व्रत्तञ्च रजतं च वृतञ्च पलितञ्चेति (इतरेतरद्वन्द्वः)। विधिसूत्रमिदम्। नपुंकस्याधिकारो वर्तते। अत एव सूत्रे पठिताः नवनीतादयः शब्दाः नपुंसकलिङ्गाः भवन्ति।

**उदाहरणानि** – इदं नवनीतम्। अवनतम्। अनृतम्। अमृतम्। निमित्तम्। वित्तम्। चित्तम्। पित्तम्। व्रत्तम्। रजतम्।

वृत्तम्। पलितम्।

**१६८. श्राद्धकुलिशदैवपीठकुण्डभाण्डाङ्काङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि।।एतानि क्लीबे स्युः।**

**सूत्रार्थः** – श्राद्धकुलिशपीठादयः सूत्रे पठिताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – श्राद्धञ्च कुलिशञ्च पीठञ्च कुण्डञ्च भाण्डञ्च अङ्कञ्च अङ्गञ्च दधि च सक्थि च अक्षि च आस्यञ्च आस्पदञ्च आकाशञ्च कण्वञ्च बीजञ्चेति ''श्राद्धकुलिश................कण्वबीजानि'' (इतरेतरद्वन्द्वः)। नपुंसकस्याधिकारो वर्तते। एवं सूत्रोक्ताः श्राद्धादयः शब्दाः नपंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इदं श्राद्धम्। दैवम्। कुलिशम्। पीठम्। कुण्डम्। भाण्डम्। अङ्कम्। अङ्गम्। दधि। सक्थि। अक्षि। आस्यम्। आस्पदम्। आकाशम्। कण्वम्। बीजम्।

**१६९. दैवं पुंसि च।। देवम्, दैवः।**

**सूत्रार्थः** – 'दैव' शब्दो नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुज्यते।

**व्याख्या** – सूत्रे 'पुंसि' इति सप्तम्यन्तं विधेयं पदमस्ति। चकारात् नपुंसकत्वमत्र गृह्यते। पूर्वसूत्रस्यापवादसूत्रमिदम्। तत्र दैव शब्दस्य नपुंसके विधानं विहितं तं प्रबाध्य पक्षे पुंस्त्वविधानार्थपिदं सूत्रम्। अत एव 'दैव' शब्दः उभयलिङ्गे (नपुंसके पुंसि च) प्रयुज्यते इत्याशयः।

**उदाहरणानि** – इदं दैवम्। अयं दैवः।

**१७०. धान्याज्यसस्य रूप्यपण्यवर्ण्यधृष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि।। इदं धान्यमित्यादि।**

**सूत्रार्थः** – धान्याज्सस्यादयः सूत्रे पठिताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – धान्यञ्च आज्यञ्च सस्यञ्च रूप्यञ्च कुप्यञ्च पण्यञ्च वर्ण्यञ्च धिष्ण्यञ्च हव्यञ्च कव्यञ्च काव्यञ्च सत्यञ्च अपत्यञ्च अमूल्यञ्च शिक्यञ्च कुड्यञ्च मद्यञ्च हर्म्यञ्च तूर्यञ्च सैन्यञ्चेति धान्याज्यसस्य............तूर्यसैन्यानि (इतरेतरद्वन्द्वः)। विधिसूत्रमिदम्। नपुंसकस्याधिकारो वर्तते। अत एव सूत्रे वर्णिताः धान्यादयः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – इदं धान्यम्। आज्यम्। सस्यम्। रूप्यम्। कुप्यम्। पण्यम्। वर्ण्यम्। धिष्ण्यम्। हव्यम्। कव्यम्। काव्यम्। सत्यम्। अपत्यम्। अमूल्यम्। शिक्यम्। कुड्यम्। मद्यम्। हर्म्यम्। तूर्यम्। सैन्यम्।

**१७१. द्वन्द्वबर्हदःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि।।**

**सूत्रार्थः** – द्वन्द्ववर्हदुःखादयः सूत्रोक्ताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – द्वन्द्वञ्च बर्हञ्च दुःखञ्च वडिशञ्च पिच्छञ्च विम्बञ्च कुटुम्बञ्च कवचञ्च वरञ्च शरञ्च वृदारकञ्चकचेति ''द्वन्द्वबर्ह...........वृन्दारकाणि'' (इतरेतरद्वन्द्वः)। नपुंसकस्याधिकारो वर्तते। अत एव सूत्रे पठिताः द्वन्द्ववर्हादयः शब्दाः नपुंसकलिङ्गाः स्युरिति।

**उदाहरणानि** – इदं द्वन्द्वम्। बर्हम्। दुःखम्। वडिशम्। पिच्छम्। बिम्बम्। कुटुम्बम्। कवचम्। वरम्। शरम्। वृन्दारकम्।

**१७२. अक्षमिन्द्रिये।। इन्द्रिये किम्? रथाङ्गादौ मा भूत्।**

**सूत्रार्थः** – 'अक्ष' शब्दो नपुंसके प्रयुज्यते इन्द्रियेऽर्थे।

**व्याख्या** – अक्षम् इति उद्देश्यवाचकं पदम्। इन्द्रियमिति निमित्तवाचकं सप्तम्यन्तं पदम्। नपुंसकस्याधिकारो वर्तते। अत एव अक्ष शब्दः इन्द्रिये अर्थे नपुंसकलिङ्गो भवति। इन्द्रिये किम् – सूत्रे ''इन्द्रिये'' इति पदस्य ग्रहणं न स्यात् तदा अक्ष शब्दस्य रथाङ्गस्य वाचकत्वे सति नपुंसकत्वस्यापत्तिः अत एव तत्र मा भूत् एतदर्थमस्मिन् सूत्रे इन्द्रिये इति

पदस्यावश्यकताऽस्ति। आदि पदेनात्र देवनाक्षस्यापि परिग्रहो भवति।

**उदाहरणानि** – इदम् अक्षम् (इन्द्रियम्)

## अथ स्त्रीपुंसाधिकारः

**१७३. स्त्रीपुंसयोः। अधिकारोऽयम्।**

**सूत्रार्थः** – अधिकारोऽयम्। इत ऊर्ध्वं "अपत्यार्थस्तद्धिते" इति सूत्रं यावत् अस्याधिकारः प्रचलिष्यति।

**व्याख्या** – स्त्री च पुमांसश्चेति स्त्रीपुमांसौ तयोरिति (इतरेतरद्वन्द्वः)। षष्ठ्या: द्विवचनान्तं पदम्। अधिकारसूत्रमिदम्। अधिकारश्च – स्ववाक्यार्थबोधशून्यत्वे सति स्वेतरवाक्यार्थबोधकत्वम्। एतस्याधिकारान्तर्गताः पठिताः शब्दाः स्त्रीपुंसयोः प्रयुज्यन्ते इति।

**१७४. गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः।। इयमयं वा गौः।**

**सूत्रार्थः** – गो मणियष्ट्यादयः सूत्रे पठिताः शब्दाः स्त्रीपुंसयोः प्रयुक्ताः भवन्ति।

**व्याख्या** – गौश्च मणिश्च यष्टिश्च मुष्टिश्च पाटलिश्च वस्तिश्च शाल्मलिश्च मसिश्च मरीचिश्चेति "गोमणियष्टि..........मरीचयः" (इतरेतरद्वन्द्वः)। स्त्रीपुंसयोरधिकारो वर्तते। एतेन सूत्रे वर्णिता शब्दाः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इयमयं वा गौः। मणिः। यष्टिः। मुष्टिः। पाटलिः। वस्तिः। शाल्मलिः। त्रुटिः। मसिः। मरीचिः।

**१७५. मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः।। इयमयं वा मृत्युः।**

**सूत्रार्थः** – मृत्युसीधुकर्कन्ध्वादयः सूत्रे पठिताः शब्दाः स्त्रीपुंसयोः लिङ्गयोः प्रयुक्ताः भवन्ति।

**व्याख्या** – मृत्युश्च सीधुश्च कर्कन्धुश्च किष्कुश्च कण्डुश्च रेणुश्चेति "मृत्युसीधु.........रेणवः" (इतरेतरद्वन्द्वः)। स्त्रीपुंसयोरित्यस्याधिकारो वर्तते। अत एव सूत्रे वर्णिताः शब्दाः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुज्यन्ते इत्याशयः।

यथा – इयमयं वा मृत्युः। सीधुः। कर्कन्धुः। किष्कुः। कण्डुः। रेणुः।

**१७६. गुणवचनमुकरान्तं नपुंसकं च।। त्रिलिङ्गमित्यर्थः। पटु, पटुः, पट्वी।**

**सूत्रार्थः** – गुणवाचकः उकारान्तः शब्दः स्त्रियां पुंसि नपुंसके च प्रयुक्तो भवति।

**व्याख्या** – उकारोऽन्ते यस्य तदुकारान्तम्। बहुव्रीहिः समासः। नपुंसकमिति विधेयं पदम्। चकारात् स्त्रीपुंसयोः ग्रहणमत्र भवति। एतेन गुणवाचकः उकारान्तः त्रिषु लिङ्गेषु प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इदं पटु। अयं पटुः। इयं पट्वी।

**१७७. अपत्यार्थस्तद्धिते।। औपगवः, औपगवी।**

**सूत्रार्थः** – तद्धिते अपत्यार्थक प्रत्ययान्ताः शब्दाः स्त्रीपुंसयोः प्रयुक्ताः भवन्ति।

**व्याख्या** – अपत्यस्य अर्थः इति अपत्यार्थः (षष्ठीतत्पुरुषः) 'तद्धिते' इति सप्तम्यन्तं पदम्। निमित्तार्थकमिदं पदम्। स्त्रीपुंसयोरधिकारोऽत्र प्राप्यते। एतेन अपत्यार्थकप्रत्ययान्ताः शब्दाः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – औपगवः। औपगवी।

**इति पाणिनीयलिङ्गानुशासने स्त्रीपुंल्लिङ्ग प्रकरणम्।**

## ।। अथ पुं नपुंसकलिङ्गप्रकरणम्।।

**१७८. पुंनपुंसकयोः।। अधिकरोऽयम्।**

**सूत्रार्थः** – अधिकारोऽयम्। इत ऊर्ध्वं "गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च" इति सूत्रपर्यन्तम् अस्य सूत्रस्याधिकारः प्रचलिष्यति।

**व्याख्या** – पुमांश्च नपुंसकश्चेति पुंनपुसके तयोः "पुंनपुंसकयोः" (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरत्र अधिकारो वर्तते।

स्वदेशे वाक्यार्थशून्यत्वे सत्युत्तरोत्तरफल जनकत्वम्। एतेन अधिकारसूत्रान्तर्गते पठिताः शब्दाः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः भविष्यन्ति इत्याशयः।

**१७९. घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः।। अयं घृतः, इदं घृतम्।**

**सूत्रार्थः** – घृतभूतमुस्तादयः सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः स्युः।

**व्याख्या** – घृतश्च भूतश्च मुस्तश्च क्ष्वेलितश्च ऐरावतश्च पुस्तकश्च बुस्तश्च लोहितश्चेति ''घृतभृत........वुस्तलोहिताः'' (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरत्र अधिकारो वर्तते। एतेन सूत्रे वर्णिताः शब्दाः प्रकृतसूत्रेणोभयलिङ्गाः भवन्ति इति।

**उदाहरणानि** – अयं घृतः–इदं घृतम्। भूतः–भूतम्। मुस्तः, मुस्तम्। क्ष्वेलितः, क्ष्वेलितम्। ऐरावतः, ऐरावतम्। पुस्तकः, पुस्तकम्। वुस्तः, वुस्तम्। लोहितः, लोहितम्।

**१८०. शृङ्गार्घनिदाघोद्यमशल्यदृढाः।। अयं शृङ्गः, इदं शृङ्गम्।**

**सूत्रार्थः** –शृङ्ग अर्घ, निदाघ, उद्यम, शल्य, दृढ़ इत्येते शब्दाः पुंसि नपुंसके च प्रयुक्ताः भवन्ति।

**व्याख्या** – शृङ्गश्च अर्घश्च निदाघश्च उद्यमश्च शल्यश्च दृढश्चेति ''शृङ्गार्ध...........दृढाः'' (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरत्र अधिकारो वर्तते। अत एव सूत्रे पठिताः शब्दाः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – अयं शृङ्गः, इदं शृङ्गम्। अर्घः, अर्घम्। निदाघः, निदाघम्। उद्यमः, उद्यमम्। शल्यः, शल्यम्। दृढः, दृढम्।

**१८१. व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः।। अयं व्रजः, इदं व्रजम्।**

**सूत्रार्थः** – व्रजकुञ्जकुथादयः सूत्रोक्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः भवन्ति।

**व्याख्या** – व्रजश्च कुञ्जश्च कुथश्च कूर्चश्च प्रस्थश्च दर्पश्च अर्भश्च अर्धर्चश्च दर्भश्च पुच्छश्चेति ''व्रजकुञ्ज.........दर्भपुच्छाः'' (इतरेतरद्वन्द्वसमासः)। पुंनपुंसकयोरत्र अधिकारो वर्तते। एतेन सूत्रे पठिताः शब्दाः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – अयं व्रजः। इदं व्रजम्। कुञ्जः, कुञ्जम्। कुथः, कुथम्। कूर्चः, कूर्चम्। प्रस्थः, प्रस्थम्। दर्पः, दर्पम्। अर्भः, अर्भम्। अर्धर्चः, अर्धर्चम्। दर्भः, दर्भम्। पुच्छः, पुच्छम्।

**१८२. कबन्धौषधायुधान्ताः।। स्पष्टम्।**

**सूत्रार्थः** – कबन्ध, औषध, आयुध, अन्त इत्येते शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्या** – कबन्धश्च औषधश्च आयुधश्च अन्तश्चेति ''कबन्धौषधायुधान्ताः'' (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदम्। पुंनपुंसकयोरत्र अधिकारो वर्तते। अत एव सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – अयं औषधः, इदं औषधम्। कबन्धः, कबन्धम्। आयुधः, आयुधम्। अन्तः, अन्तम्।

**१८३. दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः।। एते पुंनपुंसकयोः स्युः। 'कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले' इति विश्वः शलाकावाची तु स्त्रियाम्। तथा च 'जानपद-' ( सू. ५०० ) आदिसूत्रेणायोविकारे ङीषि कुशी। दारुणि तु टाप्। 'कुशा वानस्पत्याः स्थ ता मा तात' इति श्रुतिः। 'अतः कृकमि-' ( सू. १६० ) इति सूत्रे 'कुशाकर्णीषु' इति प्रयोगश्च व्याससूत्रे च- 'हानौ तूपायनशब्दे शेषत्वात् कुशाच्छन्दः' इति। तत्र शारीरकभाष्येऽप्येवम्। एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते आच्छन्द इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः।**

**सूत्रार्थः** – दण्डमण्डादयः सूत्रे वर्णिताः शब्दाः पुंनपुंसकयोः प्रयुक्ताः स्युः।

**व्याख्या** – ''दण्डश्च मण्डश्च खण्डश्च सैन्धवश्च पार्श्वश्च आकाशश्च कुशश्च काशश्च अङ्कुशश्च कलिशश्चेति दण्डमण्ड......... कुलिशाः'' (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। पुंनपुंसकयोरत्र अधिकारो वर्तते। अत एव सूत्रे वर्णिताः शब्दाः उभयलिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** – अयं दण्डः, इदं दण्डम्। मण्डः, मण्डम्। खण्डः, खण्डम्। शवः, शवम्। सैन्धवः, सैन्धवम्। पार्श्वः, पार्श्वम्। आकाशः, आकाशम्। कुशः, कुशम्। अङ्कुशः, अङ्कुशम्। कुलिशः, कुलिशम्। काशः, काशम्।

**विशेषः** – सूत्रे निर्देष्टेषु पदेषु पुंनपुंसकयोः प्रयोगो यद्यपि सम्यगेव प्रतीयते परं इतोऽपि केचन अपवादाः प्राप्यन्ते तथाहि – विश्वकोशकाराभिमते ''कुशः'' शब्दोऽयं रामपुत्रेऽर्थे दर्भेऽर्थे योक्त्रेऽर्थे द्वीपेऽर्थे च पुल्लिङ्गे प्रयुक्तो भवति। जलेऽर्थे ''कुश'' शब्दः नंपुसके प्रयुक्तो भवति यदा 'कुश' इति तृणविशेस्य बोधकः भवति तदा कुशं तृणमिति नपुंसकलिङ्गे प्रयुक्तो भवति। कुशारूपेण शलाकावाचि गृह्यते तदा स्त्रीलिङ्गे 'कुशा' इति पदस्य प्रयोगो भवति। कुश शब्दात् ''जानपदकुण्डगोणस्थल'' ४/१/४२ इत्यादि सूत्रेण अयो विकारेऽर्थे ङीषि प्रत्यये स्त्रीलिङ्गे कुशी भवति। काष्ठादिनिर्मिता यदा गृह्यते तदा टाबन्तः स्त्रीत्वे कुशा इति भवति। तेन च 'कुशा वानस्पत्याः स्त ता मा पातेति श्रुतिः' श्रुतेः प्रमाणमधिकृत्य वक्तुं शक्यते यत् कुशा इति पदं स्त्रीलिङ्गे प्रयुक्तो भवति। अतः कृकमिकंसकुम्भः ८/३/४६ इत्यस्मिन् सूत्रे कुशाकर्णीष्विति प्रयोगो दृश्यते। महर्षि व्यास सूत्रे 'कुशा' इति पदं प्रयुक्तम्। प्रमाणमत्रहानौ तूपायन शब्दे शेषत्वात् कुशाच्छन्दः इति ब्रह्म सूत्रे वर्तते। शारीरिकभाष्येऽपि एवमेव कुशा शब्दः टाबन्तः दृश्यते। एवं श्रुतिसूत्रभाष्याणामेकवाक्यतया आच्छन्द इति आङ् प्रश्लेषादिपरो टीकाकारेण यद् वर्णितं तत्तु प्रौढिवादमात्रमेव वर्तते।

**१८४. गृहमेहदेहपट्टपटहाष्टातदाम्बुदककुदाश्च।।**

**सूत्रार्थः** – गृहमेहदेहादयः शब्दाः पुंनपुंसके प्रयुक्ताः भवन्ति।

**व्याख्या** – गृहश्चमेहश्च देहश्च पट्टश्च पटहश्च अष्टापदश्च अम्बुदश्च काकुदश्चेति गृहमेव..........ककुदाः (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरधिकारो वर्तते। अत एव सूत्रोक्ताः एते शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते।

**उदाहरणानि** – अयं गृहः, इदं गृहम्। मेहः, मेहम्। देहः, देहम्। पट्टः, पट्टम्। पटहः, पटहम्। अष्टापदः, अष्टापदम्। अम्बुदः, अम्बुदम्। काकुदः, काकुदम्।

**इति पाणिनीय लिङ्गानुशासने पुंनपुंसकलिङ्गप्रकणम्**

## ।। अथ अविशिष्टलिङ्गप्रकरणम्।।

**१८५. अविशिष्ट लिङ्गम्।।**

**सूत्रार्थः** – अधिकारोऽम्। इत ऊर्ध्वं ''सर्वादीनि सर्वनामानि'' इति सूत्रपर्यन्तम् अस्याधिकारः प्रचलिष्यति।

**व्याख्या** – न विशिष्टम् अविशिष्टम्, अविशिष्टं चासौ लिङ्गमविशिष्टलिङ्गम् (नञ्गर्भकर्मधारयः)। अधिकारसूत्रमिदम्। एतेन अस्याधिकारे पठिताः शब्दाः त्रिषुलिङ्गेषु प्रयुक्ताः भवन्ति इत्याशयः।

**१८६. अव्ययं कति युष्मदस्मदः।।**

**सूत्रार्थः** – अव्ययसंज्ञकाः शब्दाः कति, युष्मद्, अस्मद्, इत्येते शब्दाश्च त्रिषु लिङ्गेषु प्रयुक्ताः भवन्ति।

**व्याख्या** – कति च युष्मद् च अस्मद् चेति कति युष्मदस्मदः (इतरेतरद्वन्द्वसमासः)। प्रकृतसूत्रानुसारेण अव्ययसंज्ञकाः शब्दाः, कति युष्मद् अस्मद् शब्दाश्च अविशिष्टलिङ्गाः भवन्ति।

**उदाहरणानि** – अव्ययम् – उच्चैः जनोऽयम्। उच्चैः नारी। उच्चैः कुलम्। कति छात्राः। कति-कति छात्र्यः। कति पुस्तकानि। युष्मद्-त्वं बालकः। त्वं बालिका। त्वं कुलम्।

**अस्मद्** – अहं अध्यापकः। अहं अध्यापिका। अहं कुलम्।

**१८७. ष्णान्ता संख्या।।**

**सूत्रार्थः** – संख्यावाचिनः षकारान्ताः, नाकरान्ताश्च शब्दाः अविशिष्टलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – ष् च ण् च इति ष्णौ, ष्णौ अन्ते यस्याः सा ष्णान्ता (द्वन्द्वमूलक बहुव्रीहिः)। अविशिष्टस्याधिरोऽत्र वर्तते। एतेन षकारान्ताः – षट् नार्यः, षट् पुरुषाः, षट् कुलानि इत्यादयः भवन्ति। षडित्यत्र षकारान्तः षष् शब्दः। नकारान्तः – पञ्चन् शब्दः तद्यथा पञ्चनार्यः, पञ्च पुरुषाः, पञ्च फलानि इत्यादयः भवन्ति। एवं उभावपि संख्यावाचकौ शब्दौ

सूत्रनियमेन त्रिषुलिङ्गेषु प्रयुक्तौ भवतः।

**उदाहरणानि** – षट् सज्जनाः। षट् महिलाः। षट् फलानि। पञ्च गोपालकाः। पञ्च गोपालिकाः। पञ्च फलानि।

**१८८. शिष्टा परवत्। एकः पुरुषः। एका स्त्री। एकं कुलम्।**

**सूत्रार्थः** – पूर्वोक्तादविशिष्टाः शब्दाः परवल्लिङ्गाः भवन्ति।

**व्याख्या** – शिष्टात् पूर्वोक्तादन्यशब्दाः गृह्यन्ते। परवत् अर्थात् विशेष्यलिङ्गकाः भवन्ति विशेष्य विशेषणयोः समानलिङ्गकत्वात् इत्याशयः।

**उदाहरणानि** – एकः पुरुषः। एका स्त्री। एकं कुलम्।

**१८९. गुणवचनं च।। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रम्।**

**सूत्रार्थः** – गुणवाचिनः शब्दाः अविशिष्टलिङ्गाः भवन्ति।

**व्याख्या** – सूत्रेण चकारग्रहणेन परवत् इत्यनुवर्तते। एतेन गुणवाचिशब्दाश्चविशिष्टलिङ्गा परवत् भवन्ति इति सूत्रतात्पर्यम्। अर्थात् विशेष्यलिङ्गकाः इति।

**उदाहरणानि** – शुक्लः पटः। शुक्ला पटी। शुक्लं पटम्।

**१९०. कृत्याश्च।।**

**सूत्रार्थः** – कृत्यप्रत्ययान्ताः शब्दाः त्रिषु लिङ्गेषु प्रयुक्ताः भवन्ति।

**व्याख्या** – 'कृत्याश्च' इति सूत्रेण तत्यत्तव्यानीयरादयः कृत्यप्रत्ययान्ताः शब्दाः परवत् अर्थात् परवल्लिङ्गाः भवन्ति इति सूत्रतात्पर्यम्।

**उदाहरणानि** – अर्चनीया भारतमाता। अर्चनीयो भारतदेशः। अर्चनीयम् भारतराष्ट्रम्।

**१९१. करणाधिकरणयोर्ल्युट् च।।**

**सूत्रार्थः** – करणाधिकरणयोर्विहिताः ल्युट् प्रत्ययान्ताः शब्दाः अविशिष्टलिङ्गाः भवन्ति।

**व्याख्या** – करणाञ्चाधिकरणञ्चेति करणाधिकरणे, तयोः करणाधिकरणयोः (इतरेतरद्वन्द्वः)। चकारो समुच्चयार्थकोऽत्र प्रयुक्तः। एतेन करणाधिकरणयोः विहिताः शब्दाः ल्युट् प्रत्ययान्ताश्च त्रिषु लिङ्गेष्वेव प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – करणे – इध्मप्रवश्चनः कुठारः। अधिकरणे – गोदोहनी स्थाली। प्रवृश्च्यन्तेऽनेनेति प्रव्रश्चनः। इध्मानां प्रवश्चनः – = इध्मप्रवश्चनः। शात्यन्तेऽनेनेति शातनः। पलाशानां शातनः– = पलाश शातनः। उपमीयतेऽनेनेत्युपमानम्। दृश्यतेऽनेनेति दर्शनम्। उह्यतेऽनेनेति वाहनम्। आवर्त्यते अस्याम् इति आवर्त्तनी। दुह्यतेऽस्यामिति दोहनी, गवां दोहनी–गोदोहनी धीयतेऽस्यामिति धानी, राज्ञोधानी–राजधानी।

**१९२. सर्वादीनि सर्वनामानि।। स्पष्टार्थेयं त्रिसूत्री।।**

**सूत्रार्थः** – सर्वादिगणपठिताः सर्वनामसंज्ञकाः शब्दाः अविशिष्टलिङ्गाः भवन्ति।

**व्याख्या** – सर्वः आदिर्येषान्तानि सर्वादीनि। (बहुव्रीहिः समासः) सर्वादिगण पठितानां शब्दानां त्रिषु लिङ्गेषु प्रयोगो भवति।

**उदाहरणानि** – सर्वाः बालिकाः। सर्वे बालकाः। सर्वाणि पुस्तकानि। अन्यः जनः। अन्या छात्रा। अन्यत् पुस्तकम्। सः बालकः। सा बालिका। तत् फलम्।

**इति पाणिनीय लिङ्गानुशासने स्त्रीलिङ्गप्रकरणम्**

**वस्तुनिष्ठप्रश्नाः**

१. ''ईकारान्तश्च'' इति सूत्रस्योदाहरणं किम्?

(अ) नर्तकी (ब) लक्ष्मीः (स) ब्राह्मणी (द) गौरी

२. ‘संसद्’ इति शब्दस्य प्रयोगः कस्मिन् लिङ्गे भवति?
(अ) पुंल्लिङ्गे (ब) स्त्रीलिङ्गे (स) नपुंसकलिङ्गे (द) पुंनपुंसके
३. याच्यामोघा वरमधिगुणे नाधमे लब्धकामा इत्यत्र याच्ञा कस्मिन् लिङ्गे प्रयुक्तोऽस्ति।
(अ) स्त्रीलिङ्गे (ब) पुंल्लिङ्गे (स) नपुंसकलिङ्गे (द) स्त्रीपुल्लिङ्गे
४. ‘रुत्वन्तः’ इति सूत्रस्योदाहरणं किम्?
(अ) दारू (ब) कशेरू (स) सक्तुः (द) सेतुः
५. ‘नोपधः’ इति सूत्रस्योदाहरणं किम्?
(अ) भवनः (ब) यानः (स) मानः (द) इनः
६. अधोलिखितेषु उभयलिङ्गे प्रयुक्तो भवति?
(अ) दीपः (ब) पापम् (स) रूपम् (द) शूर्पः
७. ‘षोपधः’ इति सूत्रस्योदाहरणं किम्?
(अ) वर्षः (ब) विषः (स) वृषः (द) यूषः
८. अधोलिखितेषु पुंसि बहुत्वे न प्रयुज्यते।
(अ) दारा (ब) लाजा (स) अक्षत (द) वर्षा
९. अधोलिखितेषु स्त्रीयां बहुत्वे न प्रयुक्तो भवति।
(अ) अप् (ब) समा (स) सिकता (द) लाजा
१०. ‘नाम’ शब्दः कस्मिन् लिङ्गे प्रयुक्तो भवति?
(अ) पुंल्लिङ्गे (ब) स्त्रीलिङ्गे (स) नपुंसकलिङ्गे (द) पुंनपुंसके

**लघूत्तरात्मक प्रश्नाः –**

१. विंशतितः नवतिपर्यन्तं संख्याशब्दानां लिङ्गविधायकं सूत्रं किम्?
२. ‘शष्कुलिः’ अस्य किं लिङ्गं केन सूत्रेण च भवति?
३. ल्युट् प्रत्ययान्तस्य शब्दस्य कस्मिन् लिङ्गे प्रयोगो भवति? सूत्रञ्च किम्?
४. ‘निष्ठा च’ इत्यस्योदाहरणं लिखत।
५. ‘त्रिरात्रम्’ इत्यत्र लिङ्गनिर्धारकं सूत्रं विलिख्य लिङ्गनिर्णयः करोतु।
६. पद्मः – पद्मम् कमलः–कमलम्, उत्पलः–उत्पलम् इति कथम्? सूत्रदिशा प्रकाशयतु।
७. आम्रम्, वृक्षः इत्यत्र लिङ्गनिर्धारणं सूत्रदिशा विधीयताम्।
८. ‘इदं यशः’ इत्यत्र किं लिङ्गं केन सूत्रेण च भवति।
९. द्विगु समासान्तः शब्दः किस्मन् लिङ्गे प्रयुक्तो भवति, सोदाहरणं स्पष्टयतु।
१०. ‘द्वन्द्वैकत्वम्’ इति सूत्रस्य सोदाहरणमर्थो लेख्यः।

**निबन्धात्मक प्रश्नाः –**

१. अप्सुमनस्समासिकता वर्षाणां बहुत्वं च। सूत्रस्यास्य बहुत्वं प्रायिकं कथं?
२. ‘शलाका स्त्रियां नित्यम्’ सूत्रेऽस्मिन् ‘नित्यम्’ इति पदस्य किमौचित्यं प्रकाशयतु।
३. ‘असन्तो द्वयच्कः’ इत्यत्र द्वयच्कः किम्? स्पष्टयतु।
४. ‘संख्यापूर्वारात्रिः’ सूत्रेऽस्मिन् संख्यापूर्वेति किम्?
५. तिसृ, चतसृ अनयोः ऋकारान्तत्वेऽपि ‘‘ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः’’ अस्मिन् सूत्रे कथं न ग्रहणम्?